# अध्यापकमित्रम्
# केरलपाठावलिः
# संस्कृतम्
# अष्टमी कक्ष्या
# संस्कृतविद्यालयानां कृते।

**TEACHER TEXT**

## KERALA SANSKRIT READER

## Standard VIII

**For Sanskrit Schools only**


Government of Kerala
Department of Education
2015

## TEXT BOOK DEVELOPMENT COMMITTEE

### SANSKRIT STANDARD VIII

### PARTICIPANTS

1. **Lekha. K**, H.S.A , S.N.V.S H.S Thrikkaruva, Kollam-691602
2. **Rajalekshmi Pillai.S**, H.S.A , H.S for Boys, Thevalakkara, Kollam
3. **Alice.O**, H.S.A ,S.V.H.S.S Clappana, Kollam
4. **S. SreeKumar**, P.P.M. H.S, Karakonam,Thiruvananthapuram
5. **S. Unnikrishnan Nair** . B.R.C Trainer (Rtd.) Charippurathuplavila veedu, Edackidom P.O, Kollam
6. **N. Aravindakshan**, GUPS Mangaram, Pandalam, Pathanamthitta.

### EXPERTS

1. **Madhavan Pillai. V**, Associate Professor in Sanskrit (Rtd.) Govt. College for Women.
2. **Dr.T.D Suneethi Devi**, Special Officer (Sanskrit) DPI, Kerala.
3. **Ramachandran.N.K**, District Education Officer (Rtd.)

### ADVISOR

1. **Dr. R. Vasudevan Potti**, Professor (Rtd), Govt. Sanskrit Collage, Thiruvananthapuram

### Academic Co ordinator

**Dr.Shameeja.P**
Research Officer (Sanskrit) SCERT

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

# भूमिका

छात्रकेन्द्रीकृता प्रवर्तनाधिष्ठिता नूतनाशयैः सन्निविष्टा च पाठ्यपद्धतिः केरलेषु प्रचलति। शिशोः समग्रं विकासं लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः। शिशुमनःशास्त्रम् अनुसृत्यैव परिष्कृता पाठ्यपद्धतिः।

प्रथमं पाठभागः ततः पठनप्रवर्तनानि अनुबन्धश्च इति क्रमः प्रत्येकस्मिन्नेकके स्वीकृतः। पाठ्यांशस्यावतारणाय उचितसन्दर्भानायोजयितुम् अध्यापकाः सोत्सुकाः भवन्तु। तदर्थम् अध्यापकमित्रमिदम् उपकारकं भविष्यति। पाठपुस्तके निर्दिष्टानां सर्वेषामपि पठनप्रवर्तनानां प्रचालनक्रमाः उत्पन्नरूपेण परिकल्पनीयाः अंशाः निरन्तरमूल्यनिर्णयविधयश्च अध्यापकमित्रेऽस्मिन् निर्दिष्टाः। अधिकपठनप्रवर्तनान्यपि यथोचितं कक्ष्यायां दातुम् अध्यापकस्य स्वातन्त्र्यमस्ति।

लिखितानां व्यवहाररूपाणां सूचनानुसारं परिष्करणेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयं सफलं कर्तुम् अध्यापकः यतताम्। तदर्थम् अध्यापकमित्रमिदं सहायकं भवेत्। अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

भवदीयः

**डॉ. एस् . रवीन्द्रन् नायर्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद

# विषयानुक्रमणिका


| **विषयः** | **पुटसंख्या** |
|---|---|
| सामान्योपगमः। | 5 |
| संस्कृतभाषोपगमः। | 16 |
| मूल्यनिर्णयोपगमः। | 18 |
| सञ्चितपुटानां मूल्यनिर्धारणम्। | 22 |
| अध्यापकमित्रं नाम किम्? किमर्थम्? | 28 |
| वार्षिकासूत्रणम्। | 29 |
| **एककम् - 1 भारतीया संस्कृतिः** | |
| 1. **मन्दाकिनीवर्णना (काव्यम्)** | 30 |
| 2. अपौरुषेयो वेदः (उपन्यासः) | 37 |
| 3. शब्दमात्रात् न भेतव्यम् (कथा) | 47 |
| **एककम् 2 मुखं व्याकरणम्** | |
| 4. संज्ञाप्रकरणम् (व्याकरणम्) | 54 |
| **एककम् 3 काव्यभूषणम्** | |
| 5. अलङ्काराः (विवरणम्) | 66 |
| 6. वृत्तपरिचयः (विवरणम्) | 73 |

# सामान्योपगमः

## केरलविद्यालयपाठ्यपद्धतिः २०१५

जनसमुदायस्य जीवितगुणोत्कर्षेण केरलराज्यं सर्वस्य भारतदेशस्य आदर्शभूतं वर्तते। जनशिक्षायाः सार्वत्रिकख्यातिः तथा जनारोग्यरक्षणे उपलभ्यमाना सार्वत्रिकी पुरोगतिश्च प्राधान्येन केरलस्य प्रथमस्तरोपलब्धेः कारणम्।

सामान्यशिक्षाविभागस्य प्रादेशिकसर्वकारसंस्थानां चाधीने विद्यमानानां समग्रविद्याभ्यासपद्धतीनाम्, प्रबुद्धानां जनानां निरन्तरप्रवर्तनानां फलरूपेण च सार्वजनीनविद्यालयेषु नितरां गुणप्रकर्षः समजनि। एवम् आदर्शभूतस्य केरलदेशस्य शिक्षामण्डलस्य एतादृशगुणम् इतोऽप्यधिकतया वर्धयितुम् उत्कृष्टानां समर्थानां छात्राणां सृष्टिरावश्यकी। उत्कृष्टशिक्षायाः छात्राणामधिकाररूपेणाङ्गीकारे पाठ्यपद्धतेरपि गुणः दृढीकरणीयः प्रवर्धनीयश्च।

लोकपरिवृत्त्यनुसारं आधारिकविद्याभ्यासपरिचायन- पाठनरूपेण वर्तमाना प्रक्रिया अपि उचितरूपेण परिवर्तनीया। विद्याभ्यासप्रक्रियायां सर्वदा वर्तमानानां, विविधमण्डलेषु विद्यमानानां चिन्तासरणीनां दर्शनानां चाधारेणैव अधुना पाठ्यपद्धतेः परिष्कारः प्रचाल्यते। साधुतातः अधिकसाधुतायाः इति अन्वेषात्मकः शास्त्रीयोपगमः एव अस्यावलम्बः।

देशीयपाठ्यपद्धतिमार्गरेखायां (२००५) सप्तविंशतितमे पुटे विद्याभ्यासस्य परमप्रधानानि लक्ष्याणि अधिकृत्य सूचितविषयाः प्रसक्ताः।

१ ज्ञानं विद्यालयाद्बहिः विद्यमानेन जीवितेन सह सम्बद्धं भवेत्।
२ पठनं केवलं कण्ठस्थीकरणं न भवतीति दृढीकरणाय।
३ पाठपुस्तककेन्द्रीकृतोपगमात् व्यतिरिक्ततया छात्राणां सर्वतोमुखविकासस्य सहायकरूपेण पाठ्यपद्धतौ शेषयः निर्वचनीयाः।
४ मूल्यनिर्णयोपाधयः सरलाः पठनप्रवर्तनैः उद्ग्रथिताश्च भवेयुः।

५ राज्यस्य प्रजातन्त्रराष्ट्रिये पारस्पर्ये तात्पर्यं वैजात्यातीतं स्वत्वं च पोषणीयम्।

उन्नतचिन्तया मूल्यबोधेन च युक्ता जनता यस्य कस्यापि राष्ट्रस्य अमूल्या सम्पदेव। एतदर्थम् आवश्यकानि उदात्तचिन्तया औचित्यबोधेन च युक्तानि विद्याभ्यासप्रवर्तनानि एव विद्यालयेषु प्रचालनीयानि। राज्यपुरोगतेः गतिविगतीनां निर्णये विद्याभ्यास एव समर्थः इत्यतः क्षेत्रस्यास्य गौरवप्रवर्तनेषु अध्यापकसमाजाः भागभाजः भवेयुः इति चिन्ता अस्मासु अवश्यं भवेत्।

**१.२. पाठ्यपद्धतिपरिष्कारस्य प्रसक्तिः।**

अतीते पञ्चवर्षाभ्यन्तरे विद्याभ्यासमण्डले आगोलव्यापकतया नूतनाशयाः अवतारिताः, केचन नियमाश्च निर्मिताः। एतद्विना वर्तमानपाठ्यपद्धतेः परिमितयः न्यूनताश्च अक्कादमिकाः चर्चाभिः पठनैः च प्रत्यभिज्ञातवन्तश्च। चर्चाः पठनं च क्रोडीकृत्य परिमितीः परिहृत्य पुरोगमनं कालस्यास्यावश्यकं भवतीत्येतदेव परिष्करणममुं प्रसक्तं करोति।

निश्शुल्कं निर्बन्धं च विद्याभ्यासं लब्धुं विद्यार्थिनाम् अधिकारनियमः प्रवृत्तिपथमागतः इत्येतदेवात्र प्रधानतया सूचनीयम्। अनेन नियमेन विवक्षितेषु कार्येषु केरलराज्यं पुरोगामि भवति। उत्कृष्टः विद्याभ्यासः सर्वेभ्यो दातुमेव अस्माभिः श्रद्धा देया। एतादृशरीत्या समग्रविद्यालयविकसनपरिप्रेक्ष्यम् इति लक्ष्यं सार्थकं कर्तुम् अस्माकं पाठ्यपद्धतिः अन्तर्देशीयमानं प्रापणीया भवति। अन्तर्देशीयस्तरं कस्यापि एकस्य राज्यस्य न, प्रत्येकं स्तरं प्राप्तः छात्रः लोके यत्र कुत्रापि भवतु, तेनार्जनीयानां ज्ञानानाम् अनुभवानां च समाहृतरूपमेव भवेत् विद्याभ्यासः। अतः आगोलतले अवतारितानां, समुद्भूतानां नूतनानां प्रकृष्टानां च पठनबोधनानाम् आदर्शरूपाणि केरलराज्यस्य छात्रैरपि प्रापणीयानि। विद्याभ्यासाधिकारनियमस्थाः केचन भागाः अधो दत्ताः। ते पाठ्यपद्धतिपरिष्करणाय आधाररूपेण परिगणनीयाः।

**विद्याभ्यासाधिकारनियमः २००९**

विभागः २९ (अध्यायः - ५)

(पाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च।)

१. प्राथमिकविद्याभ्यासपाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च सर्वकारीयेण विज्ञापनद्वारा निर्दिष्टेनाक्कादमिकाधिकारस्थानेन प्रतिपादनीयः।

२. अक्कादमिकाधिकारस्थानस्य प्रथमोपविभागप्रकारेण पाठ्यपद्धतेः मूल्यनिर्णयप्रचालनक्रमस्य

च प्रतिपादने अधोदत्तकार्याणि परिगणनीयानि।

यथा -

१. संविधाने प्रतिष्ठितैः मूल्यैः सहानुगुणता।

२. छात्रस्य सर्वतोमुखविकासः।

३. छात्रे ज्ञानस्य नैपुणीनां च क्रमेणाभिवर्धनम्।

४. शारीरिकीणां मानसिकीनां च शेषीणां सम्पूर्णविकासः।

५. छात्रसौहृदपरे छात्रकेन्द्रीकृते प्रवर्तने च समीक्षणेन पर्यवेक्षणमुखेन च पठनम्।

६. बोधनमाध्यमरूपेण मातृभाषा प्रयोक्तव्या।

७. भीतिः, मानसिकसम्मर्दसमुत्पादकसाहचर्यम् उत्कण्ठा इत्यादिभ्यः मोचनम्, तथा स्वतन्त्रतया अभिप्रायप्रस्तावे साहाय्यदानं तथा समग्रः निरन्तरश्च मूल्यनिर्णयः।

शिक्षाधिकारनियमस्य प्रयोगावसरे निरन्तरः समग्रः च मूल्यनिर्णयः संविधानबाध्यतारूपेण संजातः। एतद्दृढीकर्तुं साहाय्यकरूपेण पाठ्यपद्धतेः परिष्कारः अत्यावश्यकः। ईदृशायामवस्थायाम् एव पाठ्यपद्धतिपरिष्कारः अस्माभिः पर्यालोचनीयः।

**केरल विद्यालयपाठ्यपद्धतेः (२००९) विशेषताः काः इति पश्यामः**

१. पठितृकेन्द्रीकृता, प्रक्रियाबद्धा, प्रवर्तनोन्मुखा. मूल्याधिष्ठिता च पाठ्यपद्धतिः।

२. बौद्धिकतले, प्रक्रियातले, मनोभावतले, मूल्यानां तले च पठितृभिः प्रापणीयेषु अधिगमेषु श्रद्धां यच्छति।

३. ज्ञाननिर्मितिः इति तत्वमाधारीकृत्य रचिता पाठ्यपद्धतिः।

४. विनिमयप्रक्रियायां वैविध्यपूर्णानां युक्तानां च पठनतन्त्राणां स्वीकाराय उपयोगाय च अध्यापकानां स्वातन्त्र्यं कल्पयति।

५. पाठनाधिगमः, विषयस्वभावः पठितृणां विभिन्नस्तरः इत्यादीन् प्रत्यभिज्ञाय पठनबोधनरीतीनामाविष्कारे आयम्यता।

६. अधिगमपठनम् आशयसम्पादनरीतिः आगमनचिन्तारीतिः चिन्तनं, नैपुणीपोषणं, सहकारितापठनं, सहवर्तित्वपठनं, प्रतिफलनचिन्तापोषणं, व्यक्तिशः संघशश्च अवसरदानम् इत्यादिकं परिगण्यन्ते।

७. निश्शुल्का सार्वत्रिकी च शिक्षा सर्वेषां छात्राणां पठनाधिगमं निश्चिनोति।
प्राक्-प्राथमिकस्तरात् उच्चतरविद्यालयस्तरं यावत् समग्रतया कल्पयित्वा कृता पाठ्यपद्धतिः।

८. एकैकस्यामपि कक्ष्यायां विविधविषयाणाम् उद्दानानि (content) देशीयविषयैः सह एकीकृत्य केरलस्य पाठ्यपुस्तकानि सज्जीकरोति।

९. देशीयस्तरवत् प्रथमद्वितीयकक्ष्ययोः परिस्थितिपठनस्य उद्ग्रथनं कृत्वा मातृभाषा, गणितं, आंगलेयभाषा इति पाठपुस्तकानि सज्जीकरोति।

१०. प्रथमतः चतुर्थपर्यन्तं कक्ष्यासु आङ्गलेयमाध्यमपुस्तकानि सज्जीकरोति।

११. श्रेष्ठभाषा, मातृभाषा चेति रीत्या च मलयालभाषापठनस्य प्राधान्यम्।

१२. प्राक्-प्राथमिकस्तरात् उच्चतरशिक्षास्तरं यावत् एकीकृतां पाठ्यपद्धतिं रूपीकृत्य औपचारिकविद्याभ्यासस्य भागं कर्तुं निर्दिशति।

१३. विज्ञानविनिमयसांकेतिकविद्या प्रत्येकं पाठ्यविषयत्वात् उपरि पाठ्यविषयाणां विनिमयं फलप्रदं कर्तुम् उपाधिरूपेण उपयोक्तव्या।

१४. विशिष्टश्रद्धार्हाणां छात्राणां कृते व्यत्यस्तं, विविधं, नूतनं च पठनतन्त्रमाविष्कृत्य प्रचालयेत्। एवमेव विविधानि मूल्यनिर्णयप्रवर्तनान्यपि रूपीकृत्य प्रचालयति।

१५. पठनाधिगमेष्वधिष्ठितस्य समग्रस्य निरन्तरस्य च मूल्यनिर्णयस्य दृढीकरणम्।

१६. आरोग्यकायिकशिक्षा, कलापठनं, प्रवृत्तिपठनम् इत्येतानि निर्बन्धपाठ्यविषयत्वेन परिगणयति।

१७. उच्चतरविद्याभ्यासतले कालानुसृतानि पाठपुस्तकानि सज्जीकरोति।

१८. राष्ट्रियशिक्षानियमस्याधारेण अधिकाराधिष्ठितशिक्षायै प्रामुख्यं ददाति।

१९. अध्यापकानां रक्षाकर्तृरूपेण छात्रस्य सुरक्षायै आश्रयरूपेण च वर्तितुम् अवसरः कल्प्यते।

२०. अध्यापकैः पालनीयायै धार्मिकसंहितायै प्राधान्यं (Code of professional Ethies for school teachers) देयम्।

२१. एकविंशतिशतकस्य पठननैपुणीः आर्जयितुम् उचितया रीत्या कालानुसृतः परिष्कारः। (21st century learning skills)

२२. मानुषिकमूल्ययुक्तानां परम्पराणां सृष्टये पर्याप्तम्।

२३. अवसरतुल्यतां समत्वं च लब्धुमुचिता विद्याभ्यासानुसृता पद्धतिः।

४. पठनं स्वाभाविकरीत्या पठितृणां बौद्धिकं, मानसिकं, प्रवर्तनपरं च समग्रविकासं लक्ष्यीकृत्य मस्तिष्क- हृदय- हस्त समन्विता पाठ्यपद्धतिः (Curriculum for the harmony of Head Heart and Hand) इति दर्शनयुक्ता पाठ्यपद्धतिरेव विवक्षते।

एवं चेत् पाठ्यपद्धत्युपगमः कीदृशः? तस्य सैद्धान्तिकः प्रायोगिकाधारः कः भवेत्।

**१.३. पाठ्यपद्धत्युपगमः।**

ज्ञानेन्द्रियाणामुपयोगेन परिस्थितेः पठने नैसर्गिकशेषिभिः सह शिशुः जायते। विश्वं नूतनरीत्या विलोक्य अवगत्य, निर्णयं कर्तुं सामर्थ्यम् एव विद्यालयात् लब्धेन औपचारिकपठनेन प्रापणीया।

स्वस्य पुरतः विद्यमानेषु प्रश्नसन्दर्भेषु भागं स्वीकृत्य प्रश्नपरिहरणप्रक्रियया एव पठनं प्रचलति। पाठ्यपद्धतिविनिमयोपगमस्य विशेषताः काः भवेयुः?

- प्रवर्तनाधिष्ठितः।
- प्रक्रियाबन्धितः।
- पठनदृढीकृतः।
- पठनाधिगमानां फलप्राप्तये पर्याप्तः।
- परिस्थितौ अधिष्ठिता।
- विकासक्षेत्राणां परिगणनात्मकः।
- पठितुः प्रकृतेरनुगुणः।
- पठनेन सहैव मूल्यनिर्णयोऽपि समन्वितः।

ज्ञाननिर्मितिवादे अधिष्ठिता पठनरीतिः पाठ्यपद्धतेः आधारः। पठितृणामार्जितज्ञानस्य आशयस्य च परिगणनया फलप्रदानां पठनप्रवर्तनानां सज्जीकरणेन स्वाभाविकज्ञाननिर्माणं कर्तुं शक्यते इत्येतदेवास्य दर्शनस्य वैशिष्ट्यम्।

**पठनानुभावाः।**

विभिन्नजीवनसाहचर्येभ्यः आगच्छतां पठितृणाम् आर्जितज्ञानं, शेषी तात्पर्यम् इत्यादीनि

विभिन्नानि एव। एतद्वैविध्यं परिगण्य व्यक्तिवैजात्यं तथा बहुमुखबुद्धिं च परिगण्य पठनानुभवानां सज्जीकरणमित्येतदेव प्रधानम्।

**पठनान्तरिक्षम्।**

पठितुः तात्पर्यं विकासं च परिगण्य विविधपठनप्रवर्तनेषु भागं ग्रहीतुं युक्तरीत्या कक्ष्या सज्जीकरणीया। छात्रकेन्द्रीकृतपठनप्रवर्तनानां साहाय्यकरीत्या प्रवर्तनाधिष्ठितपठनं कथं सज्जीकरणीयमिति अस्माभिः प्रत्यभिज्ञातं किल?

**पठनप्रक्रिया।**

- एकैकोऽपि पठिता स्वपूर्वानुभवानां संबन्धेनैन ज्ञाननिर्मितिं करोति। (knowledge construction)
- ज्ञाननिर्माणं, व्यक्तितले समाजतले च अन्तर्भावितम्।
- विविधाः पठनशेषीः (Learning skills) परिगण्य विविधैः इन्द्रियानुभवैः पठनं फलप्रदं भवति।
- सहकरणात्मके संवादात्मके चान्तरिक्षे पठनम् अन्यन्तं फलप्रदं भवति।
- पठनवेगतां परिगण्य पठनानुभवानां दानेन पठनं फलप्रदं भवति।
- पाठ्यवस्तु तात्पर्योत्पादकम् अर्थपूर्णं च भवेत्। तर्हि पठनं फलप्रदं भवति।
- पठनानुभवाः चाक्रिकरीत्या (Spiralling) अवतारयति चेत् पठनं फलप्रदं भवति।
- पठनप्रवर्तनानुगुणम् आयम्यता (Flexibility) अनुरूपीकरणं (Adaptations) पठनप्रवर्तनानां चयनं (selection) इत्यादीनां प्रचालनेन विभिन्नपठनस्य आवश्यकयुक्तान् अभिरुचियुक्तान् च परिगणयेत्।
- पर्याप्तपठनानुभवानां लाभेनैव पठनाधिगमः दृढीकर्तुं शक्यते।
- पठनं, मूल्यनिर्णयश्च उद्ग्रथितरूपेण चालनीये।
- विषयाधिष्ठितानि उद्यानानि (Contents) पठितुः पठनावश्यकताः च परिगण्य अनुगुणानि विविधानि पठनतन्त्राणि बोधनरीतयश्च प्रयुज्यन्ते चेत् पठनाधिगमः प्राप्तुं शक्यते।
- एकैकस्य समग्रविकासं (All round development) लक्ष्यीकृत्यैव पठनप्रक्रिया निश्चेतव्या।

## १.४. पठनाधिगमाः (Learning outcomes)

विविधैः विषयैः सह क्रियमाणानां प्रवर्तनानां फलरूपेण ज्ञानं शेषी, मनोभावाः / मूल्यानि च छात्रे रूपवत्कुर्वन्ति। एषु केचित् ह्रस्वकालेन, केचित् दीर्घकालेन चार्जिताः भवेयुः। एवं छात्रेषु आवश्यकानि परिवर्तनानि पूर्वमेव निश्चेतुं शक्यानि। पाठ्यपद्धतेः आसूत्रणसमये विद्यालयीयविद्याभ्यासरूपेण विविधस्तरेषु छात्रैः प्रापणीयानि लक्ष्याणि एव पठनाधिगमाः इति गण्यन्ते। केषांचन पठनप्रवर्तनानां श्रेणिभिः एकैकस्मात् एककात् प्रापणीयाः पठनाधिगमाः विकासं प्राप्य एकस्याः कक्ष्यायाः अन्ते प्रापणीयपठनाधिगमत्वेन परिणमन्ति। पठनाधिगमानां वैशिष्ट्यं किमिति चेत् ते निरीक्षणविधेयाः (Observable) मापनीयाः (Measurable) चेत्येतदेव। एकैकस्यापि एककस्य कक्ष्यायाः स्तरस्य चान्ते छात्रैः प्रापणीयं ज्ञानं, शेषीः, मूल्यानि, मनोभावाः प्राप्तानि वा इति निर्णेतुं पठनाधिगमानां विशकलनेन साध्यते। पाठ्यपद्धतेः समुचितेन विनिमयेन सर्वेषां छात्राणां पठनाधिगमः दृढीकर्तुं शक्यते।

पठनाधिगमानां विशेषः एवं संग्रहीतुं शक्यते।

यथा -

- विषयाधिष्ठितेन पठनेन पठितृभिः आर्जनीयं ज्ञानं (Knowledge) शेषीः (Skills) मनोभावाः/ मूल्यानि (Attitudes and values) इत्यादीनां समवाय एव भवेत् पठनाधिगमः।
- पठनाधिगमाः निरीक्षणीयाः (Observable) तथा मापनीयाः (Measurable) च भवेयुः।
- ह्रस्वेन दीर्घेण च कालेन आर्जिता भवेयुः पठनाधिगमाः।

## १.५. पठनविभवाः पठनसंविधानानि

पाठ्यपद्धतेः विनिमयाय उपयुक्ताः विविधाः घटका एव पठनविभवाः। पठनप्रक्रियायाः परिपूर्णतायै पठनविभवानाम् उपयोगाः आवश्यकाः।

- पुस्तकालयः
- परीक्षणशाला (गणितम् शास्त्रम् (Maths, Science)
- पठनोपकरणानि
- प्रदर्शनफलकानि

- संगणकयन्त्रपरीक्षणशाला (Computer lab)
- विविधोपयोगसमर्थानि उपकरणानि।
- एतद्विना छात्राणां शेषीः प्रकटयितुं बहवः मञ्चाः विद्यालये सन्ति किल। एते अपि पठनाधिगमान् अधिगन्तुं प्रयोक्तव्याः।
- बालसभा
- विद्यालयसभा
- समितयः
- चर्चामञ्चः
- पठनयात्रा
- सन्नद्धसंघटना (SPC, NSS, Scout, NCC etc)

छात्राणां संपूर्णविकासाय एतादृशघटकाः अत्यन्तम् अपेक्षिताः।

## १.६. संकलितविद्याभ्यासः (Inclusive education)

*विद्यालये उत्कृष्टप्रकटने समर्थस्य सहपाठिनः वासाय गृहं नास्ति, पथि वर्तमानानां नालिकानां मध्ये पाशेन निबद्धानां पटानामधस्तात् एवास्य कुटुम्बः वसति इति च प्रत्यभिज्ञानं छात्राणां मध्ये चर्चाविषयकमभूत्। केवलं मिथः दुःखकथनेन एतद्विषयः न परिह्रीयेत, इत्यवगम्य ते छात्राः अध्यापकानां साहाय्येन समाहृतं द्रव्यमुपयुज्य तस्मै गृहमेकं निर्माय यच्छन्ति।*
*-(विद्यालयानुभवः)*

कक्ष्यायां सर्वेषां समायोजनेन कस्यापि निवर्तनेन विना च पठनाय अन्तरिक्षं कल्पनीयम्। अस्माकं विद्यालयेषु प्रधानतया विभागद्वयस्यापि परिगणनां साहाय्यं, श्रद्धां च दत्वा नीतिपूर्वकः गुणोत्कर्षविद्याभ्यासः (Equitable quality education) कल्पनीयः।

- विशेषश्रद्धायाः पठनसहायस्य परिरक्षायाः आवश्यकता च केषाम्?
- सामाजिकैः आर्थिकैः च कारणैः बहिष्कृताः बालाः बालिकाश्च।
- व्यत्यस्ते विविधे च सामाजिकसांस्कृतिककुटुम्बपश्चात्तले विवेचनमनुभूयमानाः छात्राः।

अतीव दारिद्र्यमनुभूयमानाः गिरिजनाः बालिकाः, अनुसूचितजातिवर्गयुक्ताः देशान्तरगताः, स्थिरतया वासस्थानरहिताः इत्येवं क्लेशमनुभूयमानाः बहवः अन्तर्भवन्ति। परिमितीः वैजात्यानि च विविच्य ज्ञात्वा तान् अङ्गीकुर्यात् तथा बहुमन्येत इति भवेदस्माकं छात्रान् प्रत्युपगमः।

विद्यालये क्रियमाणैः समूहप्रवर्तनैः एतेषां क्लेशाः परिहर्तुं शक्यते।

- शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणाः छात्राः।

शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणानां पठनप्रयासमनुभवानां च छात्राणां प्रत्येकपठनस्य आवश्यकता अस्ति। (Special educational needs) श्रवणे न्यूनता, दृष्टिपरिमितिः, बौद्धिकपरिमितिः चलनपरिमितिः, पठनन्यूनता, *ओट्टिसं* (Autism), मस्तिष्कविघातः (Cerebral palsy) बहुमुखवैकल्यानि वैकारिकासन्तुलितावस्थायुक्ताः च एषु अन्तर्भवन्ति।

पाठ्यपद्धतेः विनिमयाय के के मार्गाः अस्माभिरनुवर्तनीयाः?

- पठनावश्यकानि, अभिरुचिः इत्येतानि परिगण्य पठनप्रवर्तनासूत्रणम्।
- पठनप्रवर्तनेषु छात्राणां सर्वेषामपि भागभागित्वं लब्धुं पाठासूत्रणस्य अनुरूपीकरणम्।

छात्राणां सर्गशेषीः बुद्धेः विविधतलाञ्च उद्दीपयितुं च समुचितरीत्या सूचनासांकेतिकविद्यायाः (ICT) साध्यताः प्रयोक्तव्याः। अस्याः प्रयोगः जिज्ञासाप्रवर्धकः पठनविषयं प्रति तात्पर्यजनकश्च भवेत्। इन्द्रियपरिमितिमनुभूयमानानां एषा साध्यता अतीव प्रयोजनप्रदा भवेत्। अनेन दृश्यश्राव्यरूपेण विषयान् अनुभववेद्यं कर्तुं शक्यन्ते। व्यत्यस्तपठनशैलीः परिगण्य पठनानुभवान् दातुम् अनया शक्यते।

**अध्यापनसंहिता (Teaching manual)**

पठनाधिगमान् लक्ष्यीकृत्य प्रत्येकम् अध्यापकः सर्गात्मकरीत्या प्रवर्तनानि आसूत्रयितुं प्रभवेत्। पाठपुस्तके अध्यापकमित्रे च दत्तानि प्रवर्तनानि स्वस्य कक्ष्यायाः अनुरूपेण आवश्यकान् अंशान् परियोज्य प्रक्रियापुटम् आयोजनीयम्। एकैकं पठनाधिगमम् आप्तुं सहायकानि प्रवर्तनानि आसूत्रणे अन्तर्भावनीयानि।

- प्रवर्तनेन सह मूल्यनिर्धारणमपि अन्तर्भाव्य एव प्रक्रियापुटं लेखनीयम्।
- निरन्तरमूल्यनिर्णयेन लभ्यमानायाः सूचनायाः अङ्कनमेव प्रतिकरणपुटे आवश्यकम्।

एकस्य सप्ताहस्य कृते सज्जीकृता अध्यापनसंहिता विद्यालयीयप्रकृष्टसङ्घे (SRG)

विषयसमित्यां (Subject Council) च अवतारणीया। एकसप्ताहात्मकस्य प्रतिकरणपुटस्य सूचनाः आधारीकृत्य प्रतिफलनटिप्पणिं लिखित्वा SRG / SC मध्ये अध्यापकैः चर्चा करणीया। अस्याः टिप्पण्याः आधारेण अध्यापकस्य भाविनि आसूत्रणानि युक्तानि भवन्ति। अध्यापनसंहितायाः प्रारूपम् अधोदत्तम्।

| **अध्यापनसंहिता** |
|---|
| पाठस्य नाम -<br>दिनाङ्कः -<br>प्रतीक्षितः समयः -<br>पठनाधिगमः -<br>आशयः -<br>शेषीः -<br>भाषावस्तुताः-<br>व्यहाररूपाणि-<br>मूल्यानि, सामग्र्यः -<br>प्रतीक्षितानि उत्पन्नानि- |

| **प्रक्रियापुटम्** | **निर्धारणपुटम्** |
|---|---|
| प्रवर्तनेन मूल्यनिर्णयेन च युक्ता प्रक्रिया | निर्धारणसूचनाः अत्र लेखनीयाः |

प्रथमाध्यापकस्य हस्ताक्षरम्

अध्यापकस्य / अध्यापिकायाः हस्ताक्षरम्

| **प्रतिफलनात्मिका चिन्ता (Reflection) मम अधिगमः निर्णयश्च** |
|---|
| (पठनप्रवर्तनानां मूल्यनिर्धारणप्रक्रिया द्वारा लब्धानां सूचनानाम् आधारेण।<br>•<br>•<br>•<br>अनुस्यूतप्रवर्तनानि परिहारप्रवर्तनानि।<br>•<br>•<br>• |

प्रतिफलनात्मिका चिन्ता - पूर्वं निश्चितान् पठनाधिगमान् अनुसृत्य निर्वहणं कृतानां प्रवर्तनानां पूर्तीकरणानन्तरमेव प्रतिफलनात्मिकचिन्ता टिप्पणी सज्जीकरणीया।

- पूरिताः टिप्पण्यः प्रतिवारं SRG योगे अवतारणीयाः।
- अनुस्यूतासूत्रणाय दिशाबोधदानम्।
- सत्रस्य निरन्तरमूल्यनिर्णयश्रेणीक्रोडीकरणम्।

# संस्कृतभाषोपगमः।

भारते विविधाः भाषाः सन्ति। तासु भाषासु श्रेष्ठा मातृतुल्य च भवति संस्कृतभाषा। अस्याः भाषायाः पठनेन भारतस्य संस्कृतिं पैतृकं च यथावत् ज्ञातुं शक्यते। २०१४ (चतुर्दशाधिकद्विसहस्रम्) वर्षादारभ्य प्रथमकक्ष्यातः संस्कृतपठनाय केरलीयानां छात्राणां अवकाशः लब्धः इति कार्यं सन्तोषदायकं भवति। अस्माकं मातृभाषायां प्रादेशिकभाषायां च बहूनि संस्कृतपदानि सन्ति इत्यतः केरलीयछात्राणां कृते संस्कृतपठनं सुकरमेव।

आधुनिकेऽस्मिन् भारते बहवः संस्कृतग्रामाः सन्ति। संस्कृतग्रामाणां संख्या वर्धते प्रतिवर्षम्। आधुनिकविषयान् अधिकृत्यापि बहवः ग्रन्थाः संस्कृते प्रतिदिनं जायन्ते। आधुनिकसाङ्केतिकविद्यायामपि संस्कृतभाषायाः स्वाधीनं सुष्ठु वर्तते। अतः संस्कृतपठनस्यावश्यकता अधिकतया वर्तते।

प्राथमिकस्तरे संस्कृतपाठपुस्तकानां रचनासमये पूर्वोक्तानि कार्याणि गणनीयानि भवन्ति। अस्माकं जीविते प्रतिदिनं श्रूयमाणानि संस्कृतपदानि ज्ञातुम् अवगन्तुं वक्तुं च छात्राः शक्ताः भवेयुः। संस्कृते आशयान् व्यक्ततया लेखितुम् अवतारयितुं च छात्राः शक्ताः भवेयुः।

संस्कृते वर्तमानाः वर्धमानाः च बालसाहित्यग्रन्थान् स्वयं पठितुं ज्ञातुम् अस्वदितुं च छात्राः समर्थाः भवेयुः।

अस्मिन् हस्तपुस्तके प्रतिस्तरं छात्रैः आर्जयितुं योग्यानि कार्याणि / उद्देश्यानि पूर्वमेव निश्चितानि सूचितानि च भवन्ति। तानि उद्देश्यानि सफलीकर्तुं योग्यानि प्रवर्तनानि अध्यापकेन कक्ष्यासु उपस्थापनीयानि। पर्याप्तं सन्नाहीकरणम् अध्यापकेन कृतं भवेत्। स्वयमेव पठितुं छात्राः शक्ताः भवेयुः। तदर्थं योग्याः अवसराः देयाः। तान् अवसरान् यथावत् प्रयोक्तुं छात्राः प्रेरितव्याः। एवं चेत् ते सर्गात्मकरचनाः कुर्वन्ति। सर्गात्मिकतया प्रेरिताः ते ज्ञाननिर्माणे व्यापृताः भविष्यन्ति।

लक्ष्येषु प्राधान्यमर्हति संस्कृतं प्रति छात्रेषु प्रीत्युत्पादनम्। तत्कार्ये अध्यापकः श्रद्धावान् भवेत्। इदानीं विद्यार्थिकेन्द्रीकृतकक्ष्यायाः प्राधान्यमेव वर्तते। छात्रेषु सत्क्रियत्वं स्थापनीयम्।

छात्राः सक्रियाः भवन्तु। तदर्थं योग्यानि पठनतन्त्राणि कक्ष्यासु प्रयोक्तव्यानि। छात्राणां जीवितेन सह बद्धानि नूतनानि तन्त्राणि प्रयोक्तव्यानि। छात्रान् संस्कृते भाषणाय प्रेरयतु। तदानीं जायमानाः प्रयासाः अध्यापकेन दूरीकरणीयाः। तदर्थमध्यापकेन

१. छात्राणां नैपुणीं ज्ञातुं यत्नः क्रियताम्। यद्यत्र न्यूनताः सन्ति चेत् ताः दूरीकर्तुं यत्नः कार्यः।

२. नैपुणीनां पोषणाय नूतनाः सन्दर्भाः समायोजनीयाः।

३. छात्रेभ्यः नूतनाः अनुभवाः देयाः।

संस्कृतपठनं मातृभाषया प्रेदेशिकभाषया च पठनाय सहायकं भवति। बाल्ये अनेकाः भाषाः पठितुं छात्रेषु नैसर्गिकी शक्तिः अधिकतया प्रतिभाति इति विद्याभ्यासविचक्षणाः वदन्ति। अतः संस्कृतपठनेन अधिकं ज्ञानमार्जयितुं शक्यते। भाषासाहित्ये इव संस्कृतसाहित्येऽपि छात्राणां तात्पर्यं प्रोत्साहनीयम्। छात्राणां रुचिं तात्पर्यं च ज्ञात्वा अध्यापकेन नूतनः सन्दर्भः कक्ष्यासु आयोजनीयः भवेत्।

भिम्नरुचयः भवन्ति जानाः छात्राः च। तेषां ज्ञानार्जनेऽपि व्यतियानमस्ति। छात्राणां स्वांशीकरणपाटवम् अध्यापकेन ज्ञातं भवेत्। स्थिरे दृढे च ज्ञाने नूतनं ज्ञानम् अधिगन्तव्यम्। अनार्जिते उद्दिष्टे ज्ञाने नूतनं ज्ञानम् उत्पादयितुं न शक्यते। इमं तत्त्वं ज्ञात्वा अध्यापकेन उचितः सन्नाहः कार्यः।

पठनं नाम स्वाभाविकी अनवरता काचन प्रक्रिया भवति। ज्ञाननिर्माणे व्यापृते छात्रे अहं पठामि इति प्रतीतिः कदापि न जायेत। पठनम् आनन्ददायकं भवतु। अतः नैसर्गिकप्रक्रिया इव भाषास्वाधीनशक्तिः संभवतु। भाषाशेषीः आर्जयति, न तु पठति इति प्रतीतिः उत्पादनीया।

भाषां न पठति, किन्तु आर्जयति। स्वयंपठनाय छात्रान् प्रेरयतु। अनुकूले सन्दर्भे छात्राः स्वयमेव पठन्ति। अनेकैः पठनप्रवर्तनैः छात्राः स्वाध्यायाय उत्सुकाः भवेयुः। उत्साही छात्रः वाचयति, लिखति, आस्वादयति, पुस्तकानि पठति च। क्रीडासु तात्पर्यमिव पठनेऽपि तात्पर्यं छात्रेषु उत्पादनीयम्। 'यस्तु क्रियावान् पुरुषः स विद्वान्' इत्यस्ति प्रमाणम्। अनुभवानामाधारे आर्जितस्य ज्ञानस्य मूल्यनिर्णयमपि सः करिष्यति। एवं स्वयं रचनायै सामर्थ्यसम्पादनाय प्रोत्साहनम् अध्यापकेन देयम्। ■

# मूल्यनिर्णयोपगमः

पठनं नाम छात्रेषु स्वाभाविकतया नैरन्तर्येण च प्रचलन्ती एका मानसिकप्रक्रिया भवति। पठनानुभवाः उद्देश्याधिष्ठिताः तथा पठनाधिगमानाधारीकृत्य च यदि भवेयुः तर्हि पठनमपि कार्यक्षमं भवेत्। छात्रैः स्वायत्तीकरणीयाः शेषीः अवबोधांश्चाधिकृत्य अध्यापकः उद्बुद्धः भवेत्। एकैकस्य पाठभागस्य अधिगमाः (Learning outcomes) विभाव्यैव पठनप्रवर्त्तनानि आसूत्रणीयानि। आसूत्रितानि प्रवर्तनानि जीवितसन्दर्भैः सह योजयित्वा अवतारयितव्यानि।

एवं स्वायत्तीकृताः शेषयः धारणाश्च पठनाधिगमान् प्रबलयितुं कियन्मात्रमुपकुर्वन्ति? पठनाधिगमान् पूर्णतया स्वायत्तीकर्तुं के के छात्राः अवशिष्यन्ते? तेभ्यः देयाः पठनानुभवाः के? ते अनुभावाः कथं देयाः? इत्यादयः चिन्ताः एव अध्यापकं मूल्यनिर्णयप्रक्रियां नयति।

## मूल्यनिर्णयस्य वैविध्यम्।

एकस्य पाठभागस्य/एककस्य विनिमयानन्तरं किमधिगतमिति निर्णेतव्यम्। अस्याः प्रक्रियायाः एव पठनसम्बन्धिमूल्यनिर्णयः (Assessmet of learning) इति नाम। पाठभागस्य पठनानन्तरं पठितुः प्रकर्षः पठनस्य स्तरः इत्यादयः अत्र निर्णीयन्ते। एषा प्रक्रिया मूल्यनिर्णयस्य एकं तलमेव भवति। साधारणतया मूल्य- निर्णयः इत्यनेन एष एवार्थः बहुभिः कल्प्यते। परं स्थूणानिखननन्यायेन पठनस्य दृढीकरणार्थं क्रियमाणस्य मुल्यनिर्णयस्यैव अधिकं प्रामुख्यं कल्पनीयम्। एष एव राज्यान्तरस्तरीयः मूल्यनिर्णयालोकः। पठनसमय एव पठनस्य कार्यक्षमतार्थम् अध्यापकेन, इतरेण, सहपाठिना एव वा क्रियमाणः व्यवहाराः भवेयुः। पठनेन सह एतादृशः मूल्यनिर्धारणः प्रतिक्रियादीनां च मूल्यनिर्णयस्य अपरं तलं भवति। अस्यैव पठनार्थं मूल्यनिर्णयः (Assessment for learning) इति नाम। एषः पठनपुरोगत्यै निरन्तरं निर्वहणीयः भवति तथा पठनप्रवर्तनेन सह ओतप्रोतः च भवति।

पठनेन स्वायत्तीकृतान् आशयान् धारणांश्च स्वयंविमर्शनात्मकतया निरीक्षणं, परिणतीनाम् अवगमञ्च निरीक्ष्य एका शोधकप्रक्रिया अप्यस्ति। अस्यैव स्वयंमूल्यनिर्णय इति वदामः। एवं स्वयं मूल्यनिर्णयेनापि पठनं साध्यं भवति। अस्यैव मूल्यनिर्णय एव पठनम् (Assessment as learning) इति नाम। पठनम् अधिकं कार्यक्षमतया निर्वहणीयं चेत् पठनार्थं मूल्यनिर्णयः, मूल्यनिर्णयः एव पठनम् इत्येतयोः अधिकं प्रामुख्यं कल्पनीयम्। एवं रीत्या पठनं फलप्रदं कर्तुं

मूल्यनिर्णयप्रक्रियायाः प्रामुख्यदायकः उपगमः एव अस्माभिः स्वीकरणीयः भवति।

## मूल्यनिर्णयोपगमः।

पठनाधिगमान् दृढीकर्तुमुद्यतः पठनोपगमः स्वीकर्तव्यः अस्ति। अतः पठनाधिगमानां दृढीकरणात्मकः मूल्यनिर्णयोपगमः (Outcome focused assessment) एव स्वीकर्तव्यः। पठनाधिगमान् आधारीकृत्य क्रियमाणेषु पठनप्रवर्त्तनेषु पठितुः सजीवसहभागता ध्रुवं भवति। विमर्शनात्मिका चिन्ता पठनस्य प्रतिफलनं प्रकटनञ्च मिथः बन्धितं ज्ञानम् इत्येतानि एव पठनाधिगमानाधारीकृतस्य पठनस्य विशेषताः।

## मूल्यनिर्णयनैरन्तर्यं समग्रता च। (CCE)

विद्यालयस्तरे निरन्तरं समग्रं च मूल्यनिर्णयं निर्दिशति। पठनं नाम छात्रेषु अनुस्यूतं वर्तमाना प्रक्रिया। अत एव मूल्यनिर्धारणप्रक्रिया च अनुस्यूतं भवेत्। छात्राणां वैज्ञानिकः सामाजिकः वैकारिकश्च विकास एव समग्रविकासः इत्यनेन बुध्यते। मूल्यनिर्धारणप्रक्रियायाः समग्रता तथा अनुस्यूतता च दृढयितुं समग्रः तथा निरन्तरमूल्यनिर्णये (CCE) प्रधानतया क्षेत्रद्वयं परिगणनीयम्।

## CCE क्षेत्रम् ।

१. वैज्ञानिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

२. सामाजिक-वैकारिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

### एतयोः विशदांशाः।

१. वैज्ञानिकक्षेत्रविकासात्मकः मूल्यनिर्णयः। (प्राथमिकस्तरः)

छात्रेण पठनीया सर्वे विषया वैज्ञानिकक्षेत्रे अन्तर्भवन्ति। भाषा-शास्त्र-गणित-समाजशास्त्र-कला-प्रवृत्ति आरोग्य-कायिकपठनानि अस्मिन् अन्तर्भवन्ति एकैकस्मिन् विषये पठनाधिगमान् अवगम्य कियत्परिमितं स्वायत्तीकृतमिति निर्धारणं करणीयम्। अत्र द्विविधः मूल्यनिर्णयः निर्दिष्टः।

१. निरन्तरमूल्यनिर्णयः (CE)

२. सत्रान्तमूल्यनिर्णयः (TE)

## निरन्तरमूल्यनिर्णयः ।

प्राथमिकस्तरे भाषाविषयाणां पठनम् अनेकासां शेषीनामार्जनाय प्रचलति। परम् अस्मिन् पठने आशयाः वस्तुताः विविधानि वैज्ञानिकक्षेत्राणि सृजनात्मकरचनाः इत्यादीनि वैविध्यपराणि उद्दानानि सन्ति। एतानि विहाय भाषाशेषिनिर्णयः दुष्करः भवति। श्रुत्वा पठित्वा च कार्यग्रहणं, कथित्वा लिखित्वा च प्रकटनं, सर्गात्मकरचनानिर्वहणम् इत्यदीनि भाषापठनेन प्रवर्धयन्ति। अतः भाषापठनस्य केवलशेषिः अथवा विज्ञानसम्पादनम् इति रूपेण पृथक्करणम् असाध्यं भवति।

प्रथमद्वितीयकक्ष्ययोः विषयवस्तूनि (themes) आधारीकृत्यैव भाषा, परिस्थितिपठनं, गणितम् इत्यादिषु विषयेषु प्रवर्त्तनानि आयोजितानि। अतः अनयोः कक्ष्ययोः उद्दानक्षेत्ररूपेण उपयुक्तानि विषयवस्तूनि प्रदिशामः। वाचिकानां लिखितानाञ्च शेषीनां विकासे प्राथमिकस्तरीयाः भवन्ति छात्राः इत्यतः उचितः आलेखनक्रमः स्फुटवाचनं श्रवणं, भाषणं, लेखनम् इत्यादिषु प्रवर्धनं लिपिविन्यासविशेष इत्यादीनि भाषानैपुणीनां प्राथमिकस्तरत्वेन परिगणनीयानि।

शास्त्रविषयेषु आशयरूपीकरणस्य एकैकस्मिन् स्तरे अर्पिताः आशयधारणाः स्वायत्तीकृताः नैपुण्यः च परिगणनीयाः।

अत्र निरन्तरमूल्यनिर्णयः त्रिविधः निर्दिष्टः।

- प्रक्रियायाः मूल्यनिर्णयः।
- सञ्चितपुटानां मूल्यनिर्णयः। (Port folio)
- एककस्तरमूल्यनिर्णयः (एकैकस्मिन् एकके साकल्येन पठनाधिगमानां मूल्यनिर्णयः।)

एते विशदीक्रियन्ते।

## प्रक्रियायाः मूल्यनिर्णयः

पठननिर्वहणसमये प्रक्रियायाः मूल्यनिर्णयं प्राधान्यमर्हति। पठनप्रक्रियायाः अङ्गीभूतानि सर्वाणि प्रवर्तनानि निर्धारणीयानि । तद्वत् अवश्यं साहाय्यमपि करणीयम्। प्रत्येकस्मिन् आशयरूपवत्करणस्तरे छात्रस्य आशयधारणाः तेन स्वायत्तीकरणीयाः शेषीः च निर्धारयितव्याः। एककानां प्रकृतिमनुसृत्य स्वयंमूल्यनिर्णयस्य पारस्परिक मूल्यनिर्णयस्य अध्यापकमूल्यनिर्णयस्य

च सूचकानि सम्पाद्य उपयोक्तुं शक्यते। प्रक्रियायाः मूल्यनिर्णयार्थम् अधोदत्तानि सूचकानि उपयोक्तव्यानि।

१. प्रवर्त्तनेषु भागभागित्वम्।

२. आशयधारणा।

३. नैपुणीनाम् आर्जनम्।

४. प्रकटनम् / अवतारणम्।

५. प्रमाणीकरणम् / सज्जीकरणम्।

सामाजिकवैकरिकक्षेत्रेषु नैपुणीनां मूल्यनिर्धारणमपि प्रक्रियायाः मूल्यनिर्णयस्य भागत्वेन सञ्चालयितव्यम्। प्रक्रियायाः वैशिष्ट्यं निर्धार्य अङ्कदानार्थं सामाजिकवैकारिकक्षेत्रेषु आर्जिताः नैपुणीः परिगणनीयाः। तदर्थम् उपयुक्तेषु पञ्चसूचकेषु विविधानां नैपुण्यः विकासः कियन्मात्रम् इति निर्धारणं पर्याप्तं भवेत्।

| **सूचकाः** | **नैपुण्यः** |
| --- | --- |
| प्रवर्तनेषु भागभागित्वम् | स्वयम् अवगमनम्, नेतृत्वेशेषिः, व्यक्त्यन्तरनैपुणी, उत्तरवादित्वबोधः |
| आशयः/धारणा | पठननैपुण्यः |
| शेषीनामार्जनम् | निर्णयस्वीकारः प्रश्नपरिहारशेषिः, सर्गात्मकशेषिः |
| प्रकटनम् / अवतारणम् | आशयविनिनयशेषिः |
| प्रमाणीकरणम् / सज्जीकरणम् | विमर्शनात्मिका चिन्ता |

प्रक्रियामूल्यनिर्णयस्य सूचकानामाधारेण तानि निर्धार्य अध्यपकस्य निर्धारणपुटे पठनप्रवर्तनानामायोजनसमय एव आवश्यकं प्रामाणीकरणं कर्तव्यम्। छात्राणां टिप्पणिपुस्तिका प्रक्रियामूल्यनिर्णयार्थं पठनरेखारूपेण उपयोक्तव्या। सत्रान्ते अङ्कत्वेन परिवर्त्य तदर्थं निश्चिते प्रारूपे (format) योजनीयम्।

## सञ्चितपुटानां मूल्यनिर्धारणम्।

पठनमधिकृत्य छात्रेभ्यः रक्षितृभ्यः, अध्यापकेभ्यश्च प्रतिक्रियादानम् (feed back) एव सञ्चितपुटस्य धर्मः। प्रक्रियेयं पठनं त्वरितं करोति। पठनप्रवर्त्तनेषु व्यापृते सति मूर्तमापन्नानि सर्वाणि उत्पन्नानि सञ्चितपुटे अन्तर्भाव्य निर्धारणीयानि। विषयबन्धिता पठनरेखा अस्मिन्नन्तर्भवति। (मम कथापुस्तकम्, मम शब्दकोशः च)

सञ्चितपुटानाम् उदाहरणानि अधः प्रदत्तानि।

- टिप्पणिपुस्तिका
- इतराः रचनाः (वैयक्तिकरचनाः, सांस्कृतिकरचनाः)
- इतराः पठनरेखाः (चित्राणि, समाहरणानि)
- पठनरेखानिर्धारणार्थं छात्रैः रूपवत्कृता सूचकाः।
- सर्गात्मकरचना।
- प्रवृत्तिपुटानि। (work sheets)
- एककनिर्धारणरेखाः।
- सञ्चितपुटनिर्धारणार्थम् अधोदत्तानि सूचकानि उपयोक्तुं शक्यन्ते।
- आशयव्यक्तता अनुयोज्यता च।
- धारणानां स्वांशीकरणम्।
- तन्मयतया अवतारणम्।
- समग्रता।
- प्रामाणीकरणस्य अनुस्यूतता।

प्रक्रियानिर्धारणं सञ्चितपुटनिर्धारणम् इत्येतेषु प्रत्येकं सूचकम् अतिप्रकृष्टम् / प्रकृष्टम्/ माध्यम् / प्रकर्षणीयम् इत्येवं मानं कृत्वा यथाक्रमं ४ / ३ / २ / १ इति अङ्का गणनीयाः। पठनप्रक्रियायां पठितुः प्रकटनं मूर्तीकृतानि उत्पन्नानि इत्येतानि निर्धारयितुम् अध्यापनसंहिता (Teaching manual) पठितुः टिप्पणीपुस्तिका इत्यादीनाम् उद्वानानि उपयोक्तुम् अध्यापकः प्रभवति।

## १. पाठासूत्रणरेखायाः परामर्शानां विशदांशाः।

पठनानुभवान् सूक्ष्मतले आसूत्रयितुं निरन्तरमूल्यनिर्णयं शास्त्रीयतां कर्तुं च पाठासूत्रणं करणीयम्। तदर्थं अध्यापनसंहितायाः (Teaching manual) स्वरूपं परिष्करणीयमस्ति। अध्यापनसंहारेषु अधोदत्ताः घटकाः अन्तर्भावयितव्याः।

- पठनाधिगमाः
- आशयः / धारणाः
- शेषिः
- मूल्यानि / मानोभावः
- पठनसामग्र्यः।
- प्रतीक्षितानि उत्पन्नानि
- समयः
- प्रवर्तनमूल्यनिर्णययुक्तः प्रक्रियापुटः, निर्धारणांशप्रतिपादितः निर्धारणपुटश्च।
- निर्धारणपुटस्य अंशान् आधारीकृत्य भावनाटिप्पणी, छायाटिप्पणी।

## २. विषयबन्धितटिप्पणिपुस्तिकासम्बन्धिनः विशदांशाः।

वैज्ञानिकक्षेत्रस्य मूल्यनिर्णयार्थम् उपयोक्तव्यं मुख्यं प्रमाणमस्ति पठितुः टिप्पणिपुस्तिका। प्रथमद्वितीयकक्ष्यासु पठनप्रक्रियामनुसृत्य विविधानां प्रवर्तनानां पूर्तीकरणाय टिप्पणीपुस्तिका सहायिका भवति। टिप्पणीपुस्तिकाद्वारा पठनाधिगमान् प्राप्तुमवसरं छात्राः लभन्ते। प्रथमद्वितीयकक्ष्यायां छात्राः कियन्मात्रं पठनाधिगमान् सम्पादितवन्तः इति निर्धारयितुमपि टिप्पणीपुस्तिका सहायिका भवति।

तृतीयतः पञ्चमीकक्ष्यापर्यन्तं कक्ष्यासु पठनं कार्यक्षमं कर्तुं विषयबन्धिता टिप्पणिपुस्तिका आवश्यकी भवति। तद्वारा पाठपुस्तकस्थानां प्रवर्तनानाम् अतिग्रहणेन छात्राः पठनाधिगमान् सम्पादयन्तीति निर्णेतुम् अध्यापकः प्रभवति। अत एव तृतीयचतुर्थपञ्चमकक्ष्यासु विषयबन्धिताः टिप्पणिपुस्तिकाः निर्धारणार्थं परिगणनीयाः। षष्ठी सप्तमी अष्टमी कक्ष्यायाः कृते विषयबन्धितानि

टिप्पणिपुस्तकानि आवश्यकानि। पठितुः सर्गात्मकता, चिन्ताप्रक्रिया, भाषानैपुणी इत्याद्याः टिप्पणीपुस्तके प्रतिफलनीयाः भवन्ति। पाठभागस्य विनिमयाय आयोजितानि तन्त्राणि तेषां पूर्तीकरणार्थं पठितुः सन्नब्धता, प्रवर्तनपुटानां विविधस्तरेषु सान्निध्यम् इत्याद्याः सर्वाः सूचनाः टिप्पणीपुस्तके भवेयुः। प्रवर्त्तनद्वारा मूर्तीकृतानि उत्पन्नानि अधिकृत्य विशदांशाः अपि अस्मिन् पुस्तके एव प्रमाणीकरणीयाः।

अध्यापिका अधिगमान् यथासमयं निर्धार्य पठनपुरोगत्यै आवश्यकः निर्देशः साहाय्यं च दद्यात्। अध्यायस्यावसाने तत्सम्बन्धिनः अधिगमान् पठिता कियन्मात्रं स्वायत्तीकृतवानिति निर्धारणार्थमपि प्रमाणत्वेन टिप्पणीपुस्तकं परिगणनीयम्। आशयव्यक्तं सन्दर्भानामाशयानां चानुयोज्यं परामर्शसहितं स्वकीयचिन्ताप्रतिफलकं स्वांशीकृतं च भवेत् टिप्पणीपुस्तकम्। कार्याणि तन्मयतया अवतारणीयानि। आशयस्य चिन्तायाश्च समग्रतया आविष्कारः अनुस्यूतः परस्परबन्धितश्च परामर्शः इत्यादीनां प्रतिफलनात्मकं भवेत् टिप्पणीपुस्तकस्य प्रमाणीकरणाम्।

**एककस्यमूल्यनिर्णयः।**

विविधान् पठनाधिगमान् परस्परबन्धेन विन्यस्यमानः घटकः भवति एककम्। अस्यैका समग्रा प्रकृतिरस्ति। एकस्य एककस्य निर्धारणेन एकां समग्रां प्रकृतिमेव निर्धारयति। वाचिकः मूल्यनिर्णयः प्रश्नोत्तरं विवृतपुस्तकमूल्यनिर्णयः प्रश्नसज्जीकरणम् उत्तरसूचिकावगमनं, नूतनी रचना, निर्धारणम् इत्यादीनि लिखितमूल्यनिर्णयेन सह परिगणनीयानि। निश्चिते एकके पठानाधिगमानां विषये छात्राः कुत्र तिष्ठन्ति इत्यवगन्तुं सहायकाः मानमापकाः उपयोक्तव्याः। एककस्य मूल्यनिर्णयार्थं सूचितानाम् आधारेण अङ्कान् दत्वा सत्रान्ते निश्चितरूपरेखायां प्रामाणीकरणीयम्। एकस्मिन् सत्रे एकाधिकम् एककस्य मूल्यं निर्धारणीयम् इत्यतः एककमूल्यनिर्णयस्य माध्यमेव (AVERAGE) सत्रान्ते योजनीयम्। अत्रोपयुक्तस्य उपकरणस्य प्रकृत्यनुसारीणि सूचकानि अध्यापकेन आयोजनीयानि। एवम् आयोजनावसरे पठनाधिगमः कियन्मात्रं स्वायत्तीकृतः इत्यस्य प्रामुख्यं देयम्। त्रयाणाम् एषां मूल्यनिर्णयानाम् अङ्कस्यानुपातिकतय श्रेणीः दत्वा एव छात्राणां निरन्तरमूल्यनिर्णय श्रेण्याः परिगणनाः। कलापठनम्, प्रवृत्तिपठनम्, आरोग्यकायिकविद्याभ्यास इत्येतेषां विषयाणामपि एवं रीत्या श्रेणी देया।

## निरन्तरमूल्यनिर्णयश्रेण्याः रीतिः।

प्रत्येकं विषयस्य प्रक्रिया, सञ्चितपुटम्, एककतलमूल्यनिर्णयः इत्येतेषु एकैकस्य अङ्काः दशांशत्वेनावगत्य तेषां योगनिर्णयः कार्यः। अस्यानुपातिकी श्रेणी अधोदत्तां पट्टिकामुपयुज्य अवगन्तव्या।

| अङ्कः | शतमानम् | श्रेणी |
|---|---|---|
| ३० | | |
| २३-३० | ७५-१०० | A |
| १८-२२ | ६०-७४ | B |
| १४-१७ | ४५-५९ | C |
| १०-१३ | ३३-४४ | D |
| दशतः न्यूनम् | ३३ तः न्यूनम् | E |

उदाहरणार्थं यस्य छात्रस्य संस्कृतभाषायाः प्रक्रिया, सञ्चितपुटः एककमूल्यनिर्णयः इत्येतेषाम् अङ्काः यथाक्रमं ८, ७, ७, इति चिन्तयन्तु, तर्हि योगः ८ + ७ + ७ = २२ भवति। पट्टिकानुसारं संस्कृतस्य निरन्तरमूल्यनिर्णयश्रेणी B भवति।

## सत्रान्तमूल्यनिर्णयः (TE)

प्राथमिकस्तरे भाषाविषयाणां सत्रे परिगणितानाम् एककानां पठनाधिगमान् आधारीकृत्य व्यवहाररूपाणि भाषावस्तुताः भाषाशेषीः इत्येतानि क्षेत्राणि परिगण्यैव सत्रे मूल्यनिर्णयः भवेत्। उद्ग्रानक्षेत्रस्य नैपुण्याश्च प्रामुख्यं दत्वा विविधानि प्रश्नरूपाणि अत्रायोजनीयानि। शास्त्रविषयाणां सत्रे परिगण्यमानानाम् एककानाम् उद्ग्रानक्षेत्राणि आधारीकृत्य पठनाधिगमस्य प्रामुख्यदायकानि आशयनैपुण्यादीनि मापयितुं पर्याप्तान् प्रश्नान् सज्जीकृत्य सत्रान्तमूल्यनिर्णयः करणीयः। प्रत्येकम् एककस्य / आशयक्षेत्रस्य अनुयोज्यं प्रामुख्यं दत्वा विविधेषु तलेषु मानसिकप्रक्रियाणाम् (ज्ञानम्, अपग्रथनम्, निगमनम्, प्रयोगः) अनुरूपं प्रामुख्यं दत्त्वा च एकं परिनिष्ठापत्रं (Blue Print) सज्जीकृत्य विविधान् प्रश्नान् अत्र सन्तीति निर्णीयैव प्रश्नपत्राणि सज्जीकरणीयानि। प्रश्नानाम् अनुयोज्यानि सूचकानि आयोजनीयानि। तदनुसारेण मूल्यनिर्णयः निर्वहणीयः।

कलापठनम्, प्रवृत्तिपठनम्, आरोग्यविद्याभ्यासः इत्येतेषां विषयाणां सत्रान्तमूल्यनिर्णयः, प्रकटनमूल्यनिर्णयरूपेण (Performace assessment) निर्वहणीयः। तेषां सहाय्यकरूपाणि हस्तपुस्तके दत्तानि।

## मूल्यनिर्णयार्थं विविधानि प्रारूपाणि (format)

प्राथमिकस्तरे कक्ष्याशिक्षकरीतिरेव अस्माकं राज्ये प्रचलति स्म। अतः कक्ष्याशिक्षकस्य प्रमाणीकरणम् अतीवक्लिष्टं भवति। (F1) प्रारूपम् एकस्मिन् सत्रे एकवारं प्रमाणीकृत्य निरन्तरमूल्यनिर्णयश्रेणी सत्रान्तमूल्यनिर्णयश्रेणी च अस्मात् प्रारूपात् वार्षिकक्रोडीकरणप्रारूपे (F3) परिवर्त्य प्रमाणीकर्तुं शक्यते। परन्तु विषयकेन्द्रीकृतरूपेण यदि कक्ष्या सञ्चाल्यते तर्हि (F2) प्रारूपे प्रमाणीकृत्य वार्षिकक्रोडीकरणप्रारूपे (F4) परिवर्त्य योजनीयम्। प्राथमिकस्तरे मलयालं विहाय अन्यभाषाध्यापकाः विषयकेन्द्रीकृतप्रारूपम् उपयुज्य प्रमाणीकुर्वन्तु। प्रतिसत्रं समानानि प्रारूपाणि उपयोक्तुं शक्यन्ते।

## श्रेणीकरणप्रणाली ।

प्रथमतः सप्तमीपर्यन्तं कक्ष्यासु निरन्तरमूल्यनिर्णयस्य श्रेणीकरणप्रणाली एव अधुना प्रचाल्यते। सा प्रणाली पुनरपि प्रथमतः अष्टमीपर्यन्तं कक्ष्यासु अनुवर्तनीया। अतः निरन्तरमूल्यनिर्णयस्य त्रयाणामपि विभागानां अङ्कान् अवगत्य तस्य योगस्य आनुपातिकं श्रेणीकरणं पर्याप्तं भवेत्। प्रत्येकं विषयस्य निरन्तरमूल्यनिर्णयः सत्रान्तमूल्यनिर्णयः इत्येतयोः प्रत्येकं श्रेणीकरणाय अधोदत्ता पञ्चबिन्दुमापिका उपयोक्तव्या।

| अङ्काः / शतांशः | श्रेणी |
|---|---|
| ७५-१०० | A |
| ६०-७४ | B |
| ४५-५९ | C |
| ३३-४४ | D |
| ३३तः अधः | E |

## मूल्यनिर्णयः - वार्षिकक्रोडीकरणं (प्राथमिकस्तरः)

सत्रत्रयेऽपि छात्रेण सम्पादिताः प्रकृष्टाः श्रेणीः/अङ्काः एव निरन्तरमूल्यनिर्णयस्य समग्रा श्रेणी। प्रथमे सत्रे यदि एकः न्यूनश्रेणीं लभेत परं पठने पुरोगतिं प्राप्ते निरन्तरमूल्यनिर्णये

प्रकर्षं स्वायत्तीकरोति तस्य कृते प्रयोजकः भवतु इति सङ्कल्पेन एव एवं निर्वहति। किन्तु एवं श्रेण्यः वर्धिताः इति निरीक्षणं शक्तं कर्तव्यम्।

प्रतिविषयं CE समग्रश्रेणी CE पट्टिकायां TE श्रेणी TE पट्टिकायां च प्रमाणीकरणीयम्। सामजिक वैकारिकक्षेत्राणां मूल्यनिर्णयः प्रत्येकं पट्टिकायम् अङ्कनीयः। छात्रेषु प्रकृष्टा नैपुणी वार्षिकक्रोडीकरण- प्रारूपे अङ्कनीया।

## सामाजिक-वैकारिकक्षेत्राणां मूल्यनिर्णयः (प्राथमिकस्तरम्)

वैज्ञानिकक्षेत्रस्येव सुप्रधानं भवति सामाजिकवैकारिकक्षेत्राणां मूल्याङ्कनम्। सङ्घरूपेण जीवितुं (Learning to live together) वैयक्तिकप्रकर्षं सम्पादयितुं (Learning to be) च युक्ता नैपुणी अत्र परिगणनीया। अपि च पठनशैलीः तन्त्राणि चान्तर्भूता पठननैपुणीसमार्जनं च अस्य क्षेत्रस्य भागत्वेन निर्णेतव्यम्। सामाजिकवैकारिक क्षेत्राणां मूल्यनिर्णयसम्बन्धिन्यः नैपुण्यः अधः प्रदत्ताः ताः एव निर्णेतव्याः।

१. आशयविनिमयशेषिः (communication skill)

२. स्वयं बोधः (self management skill)

३. नेतृत्वशेषिः (leadership skill)

४. व्यक्त्यन्तरनैपुणी (interpersonal skill)

५. निर्णयस्वीकारः (decision making skill))

६. उत्तरवादित्वबोधः (sense of responsibility)

७. विमर्शनात्मिका चिन्ता (critical thining skill)

८. सर्गात्मकशेषिः (creative thinking skill)

९. प्रश्नपरिहारशेषिः (Problem solving skill)

१०. पठननैपुण्यः (study skills)

एतासां मूल्यनिर्णयः छात्रस्य सामाजिक-वैकारिकविकसनं प्रबलीकर्तुं सहाय्यकं भवेत्। वैज्ञानिकक्षेत्रे विषयान् पाठयन्तः अध्यापकाः एव एषां मूल्यनिर्णयमपि कुर्युः। एकैकस्य विषयस्य प्रक्रियायाः निर्धारणस्य भागत्वेन अयं मूल्यनिर्णयः अपि करणीयः। अत्र प्रवर्तनेषु भागभागित्वम् इति सूचकम् उपयुज्य मूल्यनिर्णयस्य भागत्वेन स्वयं ज्ञातं नेतृत्वशेषिः व्यक्त्यन्तरनैपुणी,

उत्तरवादित्वबोधः इत्यादीन्यपि निर्णेतव्यानि। आशयधारणा इति सूचकमुपयुज्य मूल्याङ्कनस्य भागत्वेन पठननैपुणी अपि निर्णेया। शेषीनामार्जनम् इति सूचकेन सह निर्णयस्वीकारः प्रश्नपरिहरणशेषिः सर्गात्मकशेषिः इत्याद्याः निर्णेतव्याः। अवतारणं प्रकटनम् इति सूचकमुपयुज्य निर्णयेन सह आशयविनिमयशेषिः निर्णेतव्या। प्रमाणीक रणं / सज्जीकरणम् इति सूचकमुपयुज्य विमर्शनात्मिका चिन्ता निर्णेतव्या।

सामाजिकवैकारिकक्षेत्रे पठितुः उत्कर्षसम्बन्धीनि कार्याणि अवगत्यप्रमाणीकरणार्थं श्रद्धा देया। प्रतिलोमपरामर्शलेखनार्थं नैव निर्दिशति। प्रत्येकं पठितुः गुणपरा नैपुणी प्रोत्साहनीया। तदधिकृत्य प्रमाणीकरणम् अध्यापनसहितायां करणीयम्। अयं मूल्यनिर्णयः प्रत्येकं पट्टिकायां गुणात्मकतया वार्षिकक्रोडीकरणप्रारूपे अङ्कनीयः। तदर्थं प्रारूपे प्रत्येकं पङ्क्तिः योजिता। पठितुः पुरोगतिपत्रेऽपि एतत्सम्बन्धिप्रमाणीकरणाय अवकाशः देयः। ■

## अध्यापकमित्रं नाम किम्? किमर्थम्?

अधिकाराधिष्ठितविद्याभ्यासः इति लक्ष्यं सम्पादयितुं छात्राणं सर्वतोमुखविकासाय अयोजिता इयं परिष्कृता पाठ्यपद्धतिः। एतदनुसारं पठनप्रवर्तनस्य आसूत्रणे निर्वहणे च सामर्थ्यसम्पादनाय मूल्यनिर्णयप्रवर्तनानाम् आसूत्रणे निर्वहणे अध्यापकान् शक्तान् कर्तुं साहाय्यं भवति इदम् अध्यापकमित्रम्।

अस्मिन् पुस्तके पठनाधिगमाः पठनप्रवर्तनानि मूल्यनिर्णयोपाधयः अधिकवाचनांशः प्रवर्तनपुटानि इत्यादीनि कार्याणि अन्तर्भवन्ति। अधिकपठनाय साध्यतायाः उपयोगक्रमः पाठासूत्रणानि वार्षिकासूत्रणं च अस्मिन् आयोजितम्। पठनाधिगमानां प्राप्त्यर्थं यानि यानि प्रवर्तनानि आवश्यकानि तानि सर्वाणि सफलीकर्तुं स्वातन्त्र्यम् अध्यापकानाम् अस्ति।

प्रत्येकम् अध्यापकः, पूर्वोक्तरीत्या छात्राणां पठनं सफलम् कर्तुं यतताम्। तदर्थं अध्यापकमित्रं सप्रयोजकं भूयाद्।

# वार्षिकासूत्रणम्

| सत्रं | मासः | पाठः | अनुबन्धप्रवर्तनानि |
| --- | --- | --- | --- |
| पादवार्षिकमूल्यनिर्णयः | जूण् | **एककम् 1**<br>भारतीया संस्कृतिः<br>1. मन्दाकिनीवर्णना। | काव्यालपनम्, पदच्छेदलेखनम्,<br>अर्थलेखनम्, विग्रहवाक्य लेखनम्,<br>आशयावतारणम्, आलपनस्पर्धा,<br>लकारपरिचयः अन्वयलेखनम्,<br>टिप्पणी लेखनम्, चर्चा। |
| | जूलय् | 1.1 अनुवर्तते | |
| | आगस्ट् | 2.1 संज्ञाप्रकरणम् | सुत्राणां पठनम्, चर्चा,सूत्राणि पठित्वा<br>तदन्तर्गतानां वर्णावां लेखनम्।<br>उच्चारणम्,प्रत्याहारनिर्माणम् च |
| अर्धवार्षिकमूल्यनिर्णयः | सेप्तम्बर् | 3.1 वृत्तम्,अलम्कारं च<br>(गणव्यवस्था,अनुष्टुप्)<br>3.1 (अनुवर्तते) (उपमा) | अलङ्काराणां पठनम् चर्चा अलकाराणां,<br>विवेचनम्।,<br>लक्ष्यलक्षणपूर्वकलोखनम्, अलङ्कारनिर्णयः।<br>गणष्यवस्थायाः स्मरणम्। चर्चा, लेखनम् लघु<br>गुरु विवेचनम्, लक्षण उदाहरणं च पठनम्,<br>वृत्तनिर्णयम्ः आलपनम् समानवृत्त<br>श्लोक चयनम्। |
| | ओक्टोबर् | 1.2 अपौरुषेयो वेदः | उपन्यासवाचनम्।, अर्थलेखनम् । लकाराणां पठनम्।<br>अव्ययपदानां पठनम्। टिप्पणी लेखनम्।<br>उपन्यासलेखनम्।चर्चा, पट्टिकाकरणम्। |
| | नवम्बर् | अपौरुषेयो (अनुवर्तते)<br>2.1 संज्ञाप्रकरणम् | सुत्राणां पठनम्,चर्चा,सूत्राणिवृत्तिम्<br>अर्थं च पठित्वा सूत्रं लिखति। |
| | डिसम्बर् | 2.1 (अनुवर्तनम्)<br>3.1 वृत्तम्,अलङ्कारं च | |
| वार्षिकमूल्यनिर्णयः | जनुवरि | 1.3 शब्दमात्रात् न भेतव्यम्। | कथावाचनम।, सम्बोधनपदानांचयनम्।<br>अव्ययपदलेखनम् कथासम्पुटरचन।<br>नाटकावतरणम्। संश्लिष्टपदचयनम् |
| | फेब्रुवरि | 1.3 (अनुवर्तनम्)<br>3.1 वृत्तम्,अलङ्कारं च<br>2.1 संज्ञाप्रकरणम् | |
| | मार्च | आवर्तनम् | |

एककम्-१

# भारतीया संस्कृतिः

## प्रथमः पाठः
## मन्दाकिनीवर्णना।

**+É¨ÉJÉ¨É**

आदिकवेः वाल्मिकेः विश्वोत्कृष्टं काव्यं भवति रामायणम्। आदिकाव्यमिति तत् प्रसिद्धम्। तस्मिन् षट् काण्डाः सन्ति। तत्र अयोध्याकाण्डात् पञ्चनवतिसर्गात् उद्धृतः अयं भागः। चित्रकूटपर्वतात् पतितां शुभजलां हंससारससेवितां पुष्पफलद्रुमैः सहितां मणिनिकाशोदां मन्दाकिनीं नदीं वर्णयति। सा नदी वल्कलधारिभिः मुनिभिः उपसेविता, सिद्धैः अभिव्याप्ततटा, मरुत्प्रकम्पिततरुशाखाभिः नृत्यति इव पर्वतम् अभितः पुष्पपत्रैरुपशोभिता च भवति। रामः तां तटिनीं सीतायै अदर्शयत्।

**=q¶ªÉ¨É** - रामायणकाव्यं परिचिनोति।
**xÉ{ÉhÉÒ** - वाचनम्, लेखनम्, आलपनम्, विवेचनम्, भाषणम्।
**+ÉvÉÉ®ÉÒÉxIÉ:** - वाल्मीकिरामायणम्।
**B.ºÉÒ.]ÉÒ ºÉÉvªÉiÉÉ-** सी.डी, ध्वनिमुद्रिका, अर्न्तजालम्।
**EòÉ±ÉÉ¶É:** - १५

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| काव्यं (मन्दाकिनी वर्णना), रामायणस्य महत्वं, “नदी” संस्कारस्य एका घटका, मानवैः प्रकृत्या सह आनन्देन सहवासः कार्यः। | काव्यालपनम्, पदच्छेदलेखनम्, अर्थलेखनम्, विग्रहवाक्यलेखनम्, आशयावतारणम्, आलपनस्पर्धा, लकारपरिचयः अन्वयलेखनम्, टिप्पणीलेखनम् चर्चा। | काव्यमालपति। पदच्छेदं लिखति, पदानाम् अर्थं लिखति। विग्रहवाक्यं च लिखति। संस्कृतभाषायाम् आशयं वदति लिखति च। भावात्मकतया आशयं विशदयति। तालसमेतम् आलपति। परस्मैपदि-आत्मनोपादि रूपाणि विवेचयति। अन्वयं लिखति। आस्वादनटीकां रचयति। |

**|É´ÉiÉxÉ¨É 1 - EòÉ´ªÉÉ±É{ÉxÉ¨É***

**=q¶ªÉ¨É: - EòÉ´ªÉ{É`ÉxÉ¨É, +É¤´ÉÉnxÉ SÉ***

**|ÉÊGòªÉÉ :-**

कमपि काव्यभागं/ कविताभागं ध्वनिमुद्रिकायाः साहाय्येन श्रावयित्वा तादृशरीत्या आलपनाय निर्दिशति। समीचीनरीत्या यः आलपति तम् अभिनन्दति। श्रीरामोदन्तम्, नारायणीयम्, भगवद्‌गीता, सुभाषितम्, बालकविता इत्यादीनि नामाङ्कितानि चिटिकाद्वारा संघं रूपीकरोतु। लब्ध चिटिकानुसारं काव्यस्य आलपनाय एकैकं निर्दिशतु। अनन्तरं पाठपुस्तके विद्यमानम् एकैकम् श्लोकं एकैकेस्मिन् संघे वाचयतु । वाचनावसरे स्खालित्यं परिहरति। अनन्तरं संघं श्लोकालपनाय निर्दिशति। समीचीनरीत्या यः संघः आलपति तं संघं अभिनन्दति। इतरेभ्यः सङ्घेभ्यः वाचनाय प्रेरणां ददाति।

**|É´ÉiÉxÉ¨É -2 - ºÉÎ¶±É¹]{ÉnÉSÉªÉxÉ¨É ***

**=q¶ªÉ¨É - Ê´ÉOÉ½´ÉÉCªÉºªÉ ±ÉJÉxÉ¨É ***

**|ÉÊGòªÉÉ :-**

अध्यापकः छात्रान् पञ्चसंघान् करोतु। प्रत्येकं संघाय श्लोकद्वयं दत्वा संश्लिष्टपदचयनाय निर्दिशतु। अनन्तरं पदच्छेदलेखनाय निर्दिशतु। नूतनपदानाम् अर्थ लेखनाय निर्दिशतु। अनुबन्धं पठित्वा छात्राः स्वयं शोधयन्तु। अवतारयन्तु।

**|É´ÉiÉxÉ¨É 3 - +É¶ÉªÉÉ´ÉiÉÉ®hÉ¨É***

**=q¶ªÉ¨É - +É¶ÉªÉOÉ½hÉ¨É***

**|ÉÊGòªÉÉ :-**

प्रतिसङ्घं दत्तस्य काव्यभागस्य सम्यक् वाचनाय निर्दिशतु। पदार्थकथनाय निर्दिशति। पाठभागे वर्तमानम् अन्वयं सारं च पठित्वा प्रतिसङ्घम् आशयावतारणाय निर्दिशतु। अवतारण समये अध्यापकः अवश्यं साहाय्यं ददातु।

**|É´ÉiÉxÉ¨É 4 - +x´ÉªÉ¨É, +lÉÉxÉ SÉ Ê±ÉJÉÊiÉ***

**=q¶ªÉ¨É · - +É¶ÉªÉOÉ½hÉ¨É***

**|ÉÊGòªÉÉ :-**

छात्रान् पञ्च संघान् कृत्वा प्रतिविभागं श्लोकद्वयं दत्वा सम्यक् वाचनाय निर्दिशतु। तदनन्तरं प्रतिसंघं श्लोकद्वयस्य अन्वयमर्थान् च लिखन्तु।अवतरणाय निर्दिशतु।पाठपुस्तकस्य वाचनानन्तरं परिष्कृत्य लेखनाय निर्दिशतु।

**|É´ÉiÉxÉ¨É 5 - Ê]{{ÉÊhÉ±ÉJÉxÉ¨É***

**=q¶ªÉ¨É - EòÉ´ªÉÉº´ÉÉnxÉÉ{ÉhÉÒºÉ¨{ÉÉnxÉ¨É*±ÉJÉxÉºÉÉ¨ÉlªÉÈ SÉ***

**|ÉÊGòªÉÉ :-**

अध्यापकः काश्चन सूचिकाः ददाति। सूचनानुसारं वैयक्तिकरीत्या मन्दाकिनीवर्णन लेखनाय निर्दिशतु। उचितं साहाय्यं ददातु। दशनिमेषानन्तरम् अवतारणाय निर्दिशतु।मुल्यनिर्णयं करोतु। परिष्कृत्य लेखनाय निर्दिशतु।

**¨É±ªÉÊxÉhÉªÉ ºÉÊSÉEòÉ** - सूचनाः पूर्णतया उपयुक्ता ।
आशयपूर्णता।
वाक्यघटना।

(सूचनाः - शुभजला, रम्या, विचित्रपुलिना, कुसुमैरुप- मणिनिकाशोदां, सम्पन्ना, मानससर इव पुण्यतीर्थं।)

यथा -

**¨ÉxnÉÊEòxÉÒ´ÉhÉxÉ**

चित्रकूटपर्वतात् पतितां मनोहरां शुद्धजलां, हंससारससेवितां पुष्पफलद्रुमैः सहितां जटां मृगचर्म च धरन्तः वृक्षचर्मणा कृतोत्तरीयाः मुनिभिः सेवितां मरुत्वकम्पिततरुशाखाभिरावृतां मणिनिकाशजलकणैः शोभितां, विचित्रपुलिनां कुसुमैरुपसम्पन्नां मानससर इव पुण्यतीर्थमिव मन्दाकिनी नदी शोभते।

**|É´ÉiÉxÉ¨É 6** - **<¹]iÉ¨É¨É ¶±ÉÉEòSÉªÉxÉ¨É*** (आस्वादनटीकालेखनम्)

**=qÉ¶ªÉ¨É** - **+É¶ÉªÉ YÉÉi´ÉÉ ±ÉJÉxÉ¨É* ªÉÊHòn¶ÉxÉ¨É* EòÉ´ªÉÉº´ÉÉnxÉSÉÉiÉ®Ò´ÉvÉxÉ¨É***

**|ÉÊGòªÉÉ** - छात्रान् वैयक्तिकरीत्या पाठभागस्य सम्यक् वाचनाय निर्दिशतु।

छात्राः इष्टतमं श्लोकं लिखन्तु कारणम् च। अध्यापकः प्रतिछात्रम् आवश्यकं साहाय्यं ददातु। लिखितं कक्ष्यायाम् अवतारणाय निर्दिशतु। अध्यापकेन मूल्यनिर्णयं करोतु।

**¨É±ªÉÊxÉhÉªÉ ºÉÊSÉEòÉ**-आशयस्पष्टता, सयुक्तिकसमर्थनम्।

**ªÉlÉÉ** - क्वचिन्मणि निकाशोदाम्.....।

इति श्लोकम् इष्टं चेत् तस्य कारणेषु गङ्गाजलस्य शुद्धता, माणिक्यवत्, प्रशोभमानत्वम्, नदीतीरस्य सौन्दर्यं, पावनत्वात् मुनिजनाश्रयत्वं च वर्णितानि।

नानाविधैः तीररुहैः इत्यमुं श्लोकमिष्टत्वेन स्वीक्रियते चेत् तस्य कारणेषु गङ्गायाः उभयोः पार्श्वयोः कुसुमफलयुक्तानां वृक्षाणां स्थितिः (तेन सौन्दर्यं, सुगन्धं च सूचितं) कुबेरस्य मानससर इव प्रशोभमानत्वं च (तेन स्वर्गीयं सौन्दर्यं, निर्मलत्वं च) सूचितं भवेत्।

**|É´ÉiÉxÉ¨É 7 - SÉSÉÉ EòiÉ´ÉÉ xÉt: +º¨ÉiºÉºEòiÉ:{ÉÉÊ¹ÉEòÉ: <ÊiÉ Ê´É¹ÉªÉ¨ÉÊvÉEòiªÉ Ê]{{ÉhÉÒ±ÉJÉxÉ¨É***

**=qÂ¶ªÉ¨É - xÉnÒºÉ®ÉIÉhÉ EòÉªÉ¨É* VÉ±ÉºªÉ ºÉn{ÉªÉÉMÉ: EòÉªÉ:, VÉ±É VÉÒ´ÉxÉºªÉ +Ê´É¦ÉÉVªÉPÉ]EòÉ¨É <ÊiÉ YÉÉxÉºªÉ ofÒEò®hÉ¨É***

**|ÉÊGòªÉÉ :-**

छात्रान् संघं कृत्वा 'नद्यः अस्मत्संस्कृतेः पोषिकाः "इति विषयम् अधिकृत्य चर्चां कृत्वा अवतारणाय निर्दिशतु। प्रतिसंघं संघे उद्भूतानां आशयानां क्रोडीकरणाय निर्दिशतु। अध्यापकः अवश्यं साहाय्यं ददातु। अनन्तरम् एकैकं संघम् अवतारणाय निर्दिशतु। अध्यापकः क्रोडीकृत्य श्यामफलके लिखतु। छात्रान् वैयक्तिकरीत्या टिप्पणीपुस्तके लेखनाय निर्दिशतु।

**|ÉÊVÉÉxÉÉ¶ÉÉ: -** शुद्धजलम्, मनोहरतीरं, हंसैः सारसैः च सेविता, उभयोः पार्श्वयोः पुष्पफलनिर्भराः वृक्षाः सन्ति, मुनिजनावासयोग्या, तेन पावनत्वं, मानससरोवरमिव स्वर्गीयसौभाग्येन युक्ता, वायोः चालनेन कुसुमानि पर्णनि च नद्यां पतन्तीत्यतः पर्वतः नृत्यतीव प्रतिभाति। गङ्गायाः अवलोकनेन नगरवासात् प्रियादर्शनात् चातीव प्रियङ्करमिति श्रीरामस्योक्तिः नद्याः सर्वातिशयं पावनत्वं सूचयति। अतः जलस्य सदुपयोगः कार्यः, जलं जीवनस्य अविभाज्यघटकं भवति।

**|É´ÉiÉxÉ¨É - ºÉ¨¤ÉÉävÉxÉ{ÉnÉxÉÉ SÉªÉxÉ¨É**

**=qÂ¶ªÉ¨É - ºÉ¨¤ÉÉÊ r{ÉnÉxÉÉ ºü{ÉÉhÉÉ Ê´É´ÉSÉxÉ¨É***

**|ÉÊGòªÉÉ :-** वैयक्तिकरीत्या छात्रान् पाठभागस्य सम्यक् वाचनाय निर्दिशतु। अनन्तरं पाठभागे वर्तमानानि सीता

सम्बोधनपराणां पदानां चित्वा लेखनाय निर्दिशतु। सम्बोधनपदानि - प्रिये, विशालक्षि, शोभने, सीते, भामिनि।

| सम्बोधनरूपाणि | प्रथमाविभक्तिरूपाणि |
|---|---|
| प्रिये | प्रिया |
| विशालाक्षि | विशालक्षी |

| | |
|---|---|
| शोभने | शोभना |
| सीते | सीता |
| भामिनि | भामिनी |
| सीते | सीता |

**|É´ÉiÉxÉ¨É 8 - SÉSÉÉ***

विषयः -दर्शनम् चित्रकूटस्य ................मन्ये तव च दर्शनात्।

उद्देश्यम् -आशयावबोधः।

प्रानी। प

**|É´ÉiÉxÉ¨É - SÉSÉÉ***

**|ÉÊGÌªÉÉ :-**

छात्रान् संघद्वयं कृत्वा 'दर्शनं... च दर्शनम्' इति विषयमधिकृत्य चर्चां प्रचालयतु। अध्यापकः उचितं साहाय्यं संङ्घाभ्यां ददातु। प्रतिसंघं एकः इति क्रमेण कक्ष्यायामवतारणाय निर्दिशतु। आशयान् अध्यापकः क्रोडीकरोतु।

प्रधानाः अंशाः - अयोध्यावासादपि श्रेयस्करः आसीत् श्रीरामादीनां चित्रकूटवासः। मानावाः प्रकृतिमाश्रित्यैव जीवन्ति। प्रकृतिः माता एव। गंङ्गा पवित्रा, संस्कृतिवाहिनी च। अतः प्रकृतिः माता इव संरक्षणीया।

**+ÊvÉEÒÊ´É¤ÉªÉ®: ªÉ¨ÉxÉÉ**

तपनतनयेति प्रथिता यमुना, गङ्गा, सरस्वती, ब्रह्मपुत्र शोणा इत्याद्याः बह्व्यः इतराश्च बहव्यः भारतनद्यः इव कल्पनावैचित्र्याणां आस्पदा भवन्त्येव। तां कालिन्दीत्यपि व्यवह्रियते। भागवतकथासु ,विशिष्य, राधामाधवानुरागाख्यायिकासु, सचेतनतया प्रत्यक्षीभूता इयं वृन्दावनोपवनैः उपकुल्यासु अतीव रमणीया च बहुप्रकारं प्रकीर्तिता कविभिः। गोपिकारमणस्य गोपालबालकस्य अङ्गनावसनचोरणादिकं बाललीलाविलासः यमुनातटे एव संवृत्तमिति प्रसिद्धः। अकल्मष प्रेमासक्तयोः राधाकृष्णयोः केलीरङ्ग आसीदिति न केवलमस्याः कीर्तिः किन्तु यमुनां विषैः मलिनीकृतवन्तं कालियं रमणकद्वीपं प्रेषयामास श्रीकृष्णः गोव्यूहगोपालक वृन्दसुरक्षायै इत्यपि। पद्मपुराणे□पि परामृष्टः अयं यमुनातीरपरिसरः

वंगदेशीयकविना गीतगोविन्दकारेण जयदेवकविना सुमनोहरमुपवर्णितः स्वरचनायाम्। उत्तरमधुरापुरिप्रान्ते आग्रानगरं प्रदक्षणीकृत्य प्रवहन्त्याः कालिन्दीनद्याः पुलिनेष्वेव शिल्पसौन्दर्यतेजपुञ्जमिव विश्वमोहिनः 'ताज् महल्'सौधः विराजमानो वर्तते। यमुनापुलिने पौर्णमासी-ज्योत्स्नाभिषिक्तं शिल्पकलासौन्दर्यसाकल्यमिव अलौकिकप्रेमभावस्य मणिमकुटमिव च विलसन्तः 'ताज् महल्' निर्मितेः रमणीयता कृष्णगात्र्याः कालिन्द्याः शोभासमीपेन अतितरां शोभते च।

वंगदेशीयेन महाकविना जयदेवमहाशयेन गीतगोविन्दे

"स्फुरदतिमुक्तलतापरिरम्भण-
मुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगत
यमुनाजलपरिपूते"।।

इत्यपि यमुना उपवर्णिता। पद्मपुराणेऽपि यमुनावर्णनाः दृश्यन्ते।

# द्वितीयः पाठः
# अपौरुषेयो वेदः

## +É¨ÉEJÉ¨É

वेदाः चतुर्विधाः। ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदः च इति। वेदमन्त्राणां समाहरणमेव संहिता। वानप्रस्थाश्रमेषु अध्येतुम् आध्यात्मिकचिन्ताधाराः एव आरण्यकाः। आत्मविद्या प्रतिपादकवेदभागाः एव उपनिषदः। अत एव वेदान्तः। ऋग्वेदः एव लोकस्य प्रथमा साहित्य- सृष्टिः। १०२८ सूक्ताः अस्मिन् वेदे प्रतिपादिताः। वेदमन्त्रात् निष्पन्नः भवति यजुर्वेदः। सामवेदः गीतप्रधानः। वेदाङ्गानि षट्।

**=q¶ªÉ¨É** - भारतीयसंस्कृतिं प्रति आभिमुख्यम्।

**xÉ{ÉhÉÒ** - वाचनम्, लेखनम्, भाषणम्, अवतारणम्।

**EòÉ±ÉÉ¶É:** - २२

**B.ºÉÒ.]õÒ.** - सी.डी, नववाणी इत्यादयः।

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| उपन्यासः ।<br>वेदवेदाङ्गानि संस्कृतेःआधारभूताः। | उपन्यासवाचनम्।अर्थलेखनम्। लकाराणां पठनम्।अव्ययपदानां पठनम्। टिप्पणीलेखनम्।<br>उपन्यासलेखनम्। चर्चा, पट्टिकाकरणम्। | उपन्यासं वाचयति। पदानाम् अर्थं लिखति।लट्-लङ्-लृट् लकारानवगच्छति। अव्ययपदानि विवेचयति। टिप्पणीं लिखति। उपन्यासं लिखति। पट्टिकारूपेण लिखति। |

**|É´ÉiÉxÉ¨É 1 -** उपन्यासवाचनम्।

**=q|¶ªÉ¨É -** उपन्यासपठनम्,आशयावगमः च।

**|ÉÊGòªÉÉ -** स्वाभाविकसम्भाषणानन्तरं वेदानां नामान्युपयुज्य चतुः संघं रूपीकरोति। अन्तन्तरं पुस्तकस्य उत्घाटनाय निर्दिशातु। पाठभागं विविच्य ददाति। प्रदत्त पाठभागस्य सम्यक् वाचनाय निर्दिशतु। अध्यापिकायाः साहाय्येन संशयं दूरीकरोतु। दशनिमेषानन्तरं प्रतिसंघं प्रदत्तं भागमवतारयन्तु। अनन्तरं वैयक्तिकरीत्या पाठभागस्य सम्यक् वाचनाय निर्दिशति।

**|É´ÉiÉxÉ¨É 2 -** अर्थलेखनम्।

**=q|¶ªÉ¨É -** आशयग्रहणम्।

**|ÉÊGòªÉÉ -**

पाठभागं सम्यक् पठित्वा संश्लिष्टपदानां विवेचनाय ततः विश्लेषणाय च निर्दिशतु। पदानाम् अर्थानां शब्दकोशं निरीक्ष्य लेखनाय निर्दिशतु। अध्यापकः अवश्यं साहाय्यं ददातु। प्रतिसंघं कक्ष्यायां अवतारणाय निर्दिशतु। यथा वाङ्मयम्, इत्यभिधीयन्ते, तद्व्याख्यानाय नेत्राद्यङ्गभूतानि कल्पोऽथ, श्रोत्रमुच्यते, तस्मात्साङ्गमधीत्यैव इत्यादीनि।

**{ÉnÉSUÉnÉ:**

| | | |
|---|---|---|
| वाक् + मयम् | - | वाङ्मयम् |
| इति + अभिधीयन्ते | - | इत्यभिधीयन्ते |
| तत् + व्याख्यानाय | - | तद्व्याख्यानाय |
| नेत्रादि + अङ्गभूतानि | - | नेत्राद्यङ्गभूतानि |
| कल्पः+ अथ | - | कल्पोऽथ |
| श्रोत्रम् + उच्यते | - | श्रोत्रमुच्यते |
| तस्मात् + साङ्गम् + अधीत्य + एव | - | तस्मात्साङ्गमधीत्यैव |

**{ÉnÉlÉÉ:**

| | | |
|---|---|---|
| वाङ्मयम् | - | साहित्यम् |
| अधीत्य | - | पठित्वा |

**|É´ÉiÉxÉ¨É 3** - लकाराणां पठनम्

**=qù¶ªÉ¨É** - लट् ,लङ्, लृट् लकाराणां ज्ञानम्

**|ÉÊGòªÉÉ :-**

छात्रान् संघं कृत्वा पाठभागस्य सम्यक् वाचनाय निर्दिशतु। पाठभागे विद्यमानानां क्रियापदानां चयनाय निर्दिशतु। अनन्तरं पठनप्रवर्तनं पठित्वा क्रियापदविवेचनाय निर्दिशतु। अध्यापकः उचितं साहाय्यं करोतु। कक्ष्यायाम् अवतारयन्तु । पट्टिकां पूरयतु।

| यथा : | ±É] | ±ÉRó | ±É] |
|---|---|---|---|
| | भवति | अभवत् | भविष्यति । |
| | अस्ति | असीत् | भविष्यति । |
| | करोति | अकरोत् | करिष्यति । |

**|É´ÉiÉxÉ¨É 4** - अव्ययपदानां पठनम्।

**=qù¶ªÉ¨É** - अव्ययपदमुपयुज्य वाक्यलेखनम्।

**|ÉÊGòªÉÉ** -

छात्रान् संघीकृत्य पाठभागस्य सम्यक् वाचनाय निर्दिशति। वाचनानन्तरं पाठभागे विद्यमानानां अव्ययपदानां चयनाय निर्दिशतु। तानि अव्ययपदान्युपयुज्य वाक्यानि लिखन्तु। अध्यापकः साहाय्यं करोतु। (दृष्ट्वा, आगत्य, गन्तुं द्रष्टुं, प्रचाल्य, गत्वा,परिकल्प्य)

| Ci´ÉÉxiÉ¨É | ±ªÉ¤ÉxiÉ¨É | iÉ¨ÉÖzÉxiÉ¨É |
|---|---|---|
| गत्वा | अधीत्य | द्रष्टुं |
| दृष्टवा | आगत्य | गन्तुं |
| | प्रचाल्य | |
| | परिकल्प्य | |

अधीत्य - श्रीशङ्करः वेदवेदङ्गानधीत्य अद्वैतं प्रचारयामास।

गत्वा - छात्राःविद्यालयं गत्वा पाठान् पठन्ति।

दृष्ट्वा - चलच्चित्रं दृष्ट्वा बालः सन्तुष्टो बभूव।

आगत्य - बालाः विद्यालयात् आगत्य भक्षणं खादन्ति।

प्रचाल्य -शङ्गराचार्यः अद्वैतधर्मं प्रचाल्य स्वसिद्धान्तान् समर्थितवान्।

परिकल्प्य- वेदस्य शरीरत्वं परिकल्प्य वेदाङ्गानि सूचितानि।

दृष्ट्वा - बालाः चलच्चित्रं द्रष्टुं उत्सुकाःभवन्ति।

**|É´ÉiÉxÉ¨É 5 -** टिप्पणीलेखनम्

**=qÙ¶ªÉ¨É -** केन्द्राशयानां अनुबन्धाशयानां च ज्ञानार्जनम्।

**|ÉÊGòªÉÉ :-**

छात्रान् संघं कृत्वा ऋग्वेदः, यजुर्वेदः सामवेदः, अथर्ववेदः इति नामानि दत्वा पाठं सम्यक् पठित्वा पठनप्रवर्तने दत्तविषयमधिकृत्य टिप्पणीलेखनाय निर्दिशतु।

अध्यापकः अवश्यं सहाय्यं ददातु। कक्ष्यायाम् अवतारणाय निर्दिशतु। सर्वेषां सङ्घानां छांत्राणां च भागभागित्वमावश्यकम्। अध्यापकः स्खालित्यानि परिहृत्य मातृकाटिप्पणिं प्रदर्शयतु। सञ्चितपुस्तके लेखनाय निर्दिशतु।

**ªÉlÉÉ 1. Uôxn:-** वैदिकसाहित्यं अतिप्राचीनम् महत्तरं च भारतीयवाङ्मयं भवति। तत् अस्माकं संस्कृतेः सनातनधर्मस्य च मूलस्तम्भ एव। क्रान्तदर्शिनां महर्षिणां मनसि प्रत्यक्षीभूतः परमो धर्म एव वेद इति आचार्येण यास्केन उक्तम्।

वेदाः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च। देवतास्तुतिपूर्वः मन्त्रः ऋग्वेदः।

यजुर्वेदः - अत्र द्वितीयो वेदः यजुर्वेदः। देवताराधना इत्यर्थकात् यज् धातोः यजुस् याग इति पदयोः व्युत्पत्तिः गद्यपद्यमिश्रणेन रचितः। कृष्णयजुर्वेदः, शुक्लयजुर्वेदः इति भागद्वयं वर्तते।तृतीयः वेदः सामवेदः। सामवेदात् संगीतस्योत्पत्तिरिति कथ्यते। संगीतस्य चरित्रज्ञानाय सामवेदपठनम् उपकरोति।चतुर्थः वेदः- अथर्ववेदः। सामान्यजनानाम् आचारानुष्ठानानि तत्र प्रतिपादितानि।

वेदाध्यायनाय तत् व्याख्यानाय च यागादिकर्मणां सम्यगनुष्ठानाय च साहाय्यकानि भवन्ति वेदाङ्गानि। षड् वेदाङ्गानि सन्ति। तानि वेदार्थज्ञानसाधनानि भवन्ति। छन्दः वेदस्य पादः। वेदमन्त्राधिष्ठिता अक्षरगणना छन्दः। पिङ्गलमहर्षेः छन्दशास्त्रं मुख्यः ग्रन्थः।

## २. कल्पः

वेदस्य हस्तौ कल्पः एव। यज्ञसंबन्धाः मन्त्रार्थाः तत्र प्रतिपाद्यन्ते। आपस्तम्भमहर्षिः, बोधायनमहर्षिः प्रभृतयः अस्य वेदाङ्गस्य प्रवर्तकाः। कल्पशास्त्रे श्रौतसूत्रं, ब्रह्मसूत्रं, धर्मसूत्रं, शूल्बसूत्रं इति चत्वारः विभागाः सन्ति।

**|É´ÉiÉxÉ"É 6** - उपन्यासलेखनम्।

**=qÂ¶ªÉ"É** - उपन्यासपठनम्,आशयावगतिः च।

**|ÉÊGòªÉÉ** -

छात्रान् संघं कृत्वा पाठभागं सम्यक् पठित्वा अधोदत्तसूचनानुसारं वेदाङ्गान्यधिकृत्य लघूपन्यासलेखनाय निर्दिशतु। कक्ष्यायाम् अवतारयितुं निर्दिशतु। स्खालित्यं परिहरतु।

**ºÉÚSÉxÉÉ** -विज्ञानशाखाः - वेदाङ्गानां नामानि - छन्दः पादौ– इत्यादि

अतिपुरातनी अनितरसाधारणी भारतीयसंस्कृतिः लोकोत्तरा भवति। तत्र च वेदवेदाङ्गादि चतुर्दशविद्याः प्रसिद्धाः। वेदाः चत्वारः। वेदानाम् अनुबन्धतया षड् विज्ञानशाखाः वर्तन्ते। तानि एव वेदाङ्गानि। यथा शिक्षा व्याकरणं, छन्दः, निरुक्तं,ज्योतिषं,कल्पम्।

**ªÉlÉÉ** - "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
....................................... ।
.................................................
...................................................
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।"

अर्थात् वेदस्य पादौ छन्दः हस्तौ कल्पः चक्षुः ज्योतिषम्, श्रेत्रं निरुक्तं, घ्राणं शिक्षा, मुखं व्याकरणम् च। तस्माद् वेदं साङ्गम् अधीत्य ब्रह्मलोके महत्वं प्राप्यते।

**Ê¶ÉIÉÉ** - वर्णानां, पदानाम् उच्चारणरीतिः शिक्षाशास्त्रे प्रतिपाद्यते।महर्षयः, नारद, वसिष्ठ, पाणिनी च प्रमुखाः प्रवर्तकाःभवन्ति ।

**Eò±{É:-**यज्ञसम्पन्धिनां मन्त्राणाम् अर्थप्रतिपादकः भवति कल्पः।

आपस्तंबमहर्षिः बोधायनमहर्षिप्रभृतयःबहवःकल्पशास्त्रप्रवर्तकाः।

श्रौतसूत्रं,धर्मसूत्रं,गृहसूत्रं,शुल्बसूत्रं चास्य विभागाः।

**व्याकरणम्** - पदनिष्पत्तिःपदानां साधुप्रयोगःच अस्मिन् शास्त्रे प्रतिपाद्यते। पाणिनेःअष्टाध्यायी अथवा पाणिनीयमेव अत्र प्रमुखग्रन्थः।

**निरुक्तम्**- वेदमन्त्राणाम् अर्थनिर्वचनमेव अत्र प्रतिपाद्यते।

यास्कमहर्षेः निरुक्तमेव प्रधानःग्रन्थः।

**Uxn: -** वेदमन्त्राणां अक्षरगणना अस्य प्रतिपाद्यविषयः । छन्दसः प्रमाणिकग्रन्थोऽस्ति पिङ्गलाचार्यस्य छन्दस्सूत्रम्।

**VªÉÉÊiÉ¹É´É -** ग्रहाणां गतिम् आधारीकृत्य समयनिर्णयशास्त्रं भवति ज्योतिषम्।मानवस्य चक्षुरिव वेदस्य चक्षुः भवति ज्योतिषम्।

अध्यापकः मूल्यनिर्णयं करोतु।

**¨É±ªÉÉxÉhÉªÉºÉÚSÉEòÉ:** आशयपूर्णता।

भाषाशैली।

वाक्यघटना।

**|É´ÉiÉxÉ¨É 6** - चर्चा, पट्टिकाकरणम्

**=qä¶ªÉ¨É** - विविधधर्मग्रन्थानधिकृत्य ज्ञानम्।

**|ÉÊGòªÉÉ** -

छात्राः संघे स्थित्वा विविधधर्मग्रन्थानधिकृत्य चर्चां प्रचालयतु। अनन्तरं लब्धानि ग्रन्थनामानि उपयुज्य पट्टिकाकरणाय निर्दिशतु। अध्यापकेन पर्याप्तं साहाय्यं देयम्।

**vÉ¨ÉOÉxÉ|ÉÉ:**

| Ê½xnÚvÉ¨É: | ÊGò¶ÉvÉ¨É: | <º±ÉÉvÉ¨É: |
|---|---|---|
| इतिहासादीनि | बैबिल् | खुरान् |
| भगवद्गीता | | |
| पुराणानि | | |
| उपनिषदः | | |
| वेदाः | | |

**|É´ÉiÉxÉ¨É 7** - आयुर्वेदः इति विषयमधिकृत्य लघूपन्यासलेखनम्।

**=qä¶ªÉ¨É** - भारतीयचिकित्साशास्त्रमधिकृत्य ज्ञानम्।

**|ÉÊGòªÉÉ** -

अध्यापकेन पूर्वमेव प्रश्नपत्राणि सज्जीकृत्य छात्रेभ्यो दत्वा पूरणाय निर्देशः देयः। संघे स्थित्वा चर्चां कृत्वा तेषाम् उत्तराणि छात्राः लिखन्ति। अध्यापकः क्रोडीकरोतु।पुनः आयुर्वेदमधिकृत्य उपन्यासलेखनाय निर्दिशतु। अध्यापकेन उचितं साहाय्यं देयम्। अवतराणानन्तरं छात्राः टिप्पणीपुस्तके लिखन्तु।

**|É¶xÉ{ÉjÉ:**

१. वेदाः के ? ________________

२. वेदाङ्गानि कानि ? ________________

३. आयुषः वेदः कः ? ________________

४. आयुर्वेदे प्रामाणिक-
ग्रन्थः कः? कर्ता कः? ________________

५. प्रमुखः आयुर्वेदाचार्यः कः? ________________

६. आयुर्वेदे अष्टाङ्गानि कानि? ________________

७. उपवेदाः के? ________________

८. आरोग्यम् इत्यस्य को/र्थः ______________

## =kÉ®ÉÊhÉ

१ ऋक्, यजुः, सामः, अथर्वः च वेदाः भवन्ति।

२. शिक्षा, कल्पं, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषम् च वेदाङ्गानि।

३. आयुर्वेदः।

४. चरकसंहिता,तस्य ग्रन्थस्य कर्ता चरकः।

५. चरकः।

६. काय, बाल, शल्य, ग्रह, ऊर्ध्वाङ्ग, दंष्ट्रा, जरा, विषं चेति अष्टाङ्गानि।

७. आयुर्वेदः, धनुर्वेदः,स्थापत्यवेदः,गान्धर्ववेदः च।

८ . दोषसाम्यमरोगता, ।

## ={ÉxªÉÉºÉ¨É - +ÉªÉÖ´ÉænùÉ:*

भारतीयसंस्कृतेः, सनातनधर्मस्य च मूलस्तम्भाः एव वेदाः। वेदाश्चत्वारः। ऋक्, यजुः, सामः अथर्वः च। वेदानाम् अनुबन्धतया षड् विज्ञानशाखाः वर्तन्ते। त एव वेदाङ्गानि।

ªÉlÉÉ - शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं तथा कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः इति। स्थापत्यवेदः, धनुर्वेदः, गान्धर्ववेदः, आयुर्वेदः च उपवेदाः भवन्ति। वेदैः उपलक्ष्यमाणानां धर्मार्थकाममोक्षाणां साधनाय आयुर्वेदः शक्तः इत्यतः उपवेदत्वेन परिगण्यते। आयुषः वेदः भवति आयुर्वेदः। वाग्भटाचार्येण विरचितं “अष्टाङ्गहृदयम्” अस्य उपवेदस्य प्रामाणिकग्रन्थः।

तत्र ‘रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता इत्युच्यते। वातपित्तकफाश्चेति त्रयो दोषाः सन्ति। एतेषां समत्वमेव अरोगता। तदेव आरोग्यमित्युच्यते। चरक-सूश्रुत - वाग्भट-काश्यपादयः प्रधानाचार्याः।

चरकमहर्षेः चरकसंहितायां एवमुच्यते-

“हिताहितं सुखं दुःखम् आयुस्तस्य हिताहितम्।
मानं च तच्च यत्रोक्तम् आयुर्वेदः स उच्यते।।”

आयुर्वेदे हेतुः, लिङ्गं, चिकित्सा, चेति त्रयः स्तम्भाः सन्ति। तत्र होतौ रोगस्य कारणानि, लिङ्गे रोगस्य लक्षणानि, चिकित्सायाम् औषधविज्ञानं च प्रतिपादितानि सन्ति।आयुर्वेदे अष्टाङ्गानि सन्ति -

कायबालग्रहोर्ध्वाङ्गशल्यदंष्टाजराविषान्

अष्टाङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता।।

१. कायचिकित्सा - चरकसंहिता एवास्मिन् विभागे प्रामाणिको ग्रन्थः। सर्वाङ्गसम्बन्धिनां ज्वररक्तपित्तादीनां रोगाणां लक्षणं तेषां चिकित्साविधयश्च अत्र प्रतिपादिताः।

२. बालचिकित्सा - काश्यपसंहिता एव प्रामाणिको ग्रन्थः। गर्भाधानादारभ्य मातृशिशुसंरक्षणं तथा बालसंरक्षणं च अत्र प्रतिपादितम्।

३. ग्रहचिकित्सा - अस्मिन् विभागे मानसिकारोग्यसंरक्षणं प्रतिपादितम्।

४. ऊर्ध्वाङ्गचिकित्सा - शालक्यतन्त्रमिति प्रसिद्धेऽस्मिन् विभागे नेत्र श्रोत्रनासाद्यवयवसम्बन्धान् रोगान् तेषां चिकित्साविषयांश्च विशदयन्ति।

५. शल्यचिकित्सा - शस्त्रक्रियाप्रधाने अस्मिन् विभागे शरीरान्तर्भागे बहिर्वा प्राप्तानां क्षतविस्फोटादीनां यन्त्रशस्त्रप्रयोगेण अपनयनस्य चिकित्साविधयः विद्यन्ते। भारतीयाचार्याः एषु विषयेषु निष्णाताः आसन्। सुश्रुताचार्यस्य सुश्रुतसंहिता एवात्र प्रामाणिको ग्रन्थः।

६. दंष्टचिकित्सा - अगदतन्त्रमिति प्रसिद्धेऽस्मिन् विभागे सर्पकीटलूतवृश्चिकादीनां दंशनेभ्यः जायमानानां क्लेशानां परिहारोपायाः प्रतिपादिताः दृश्यन्ते।

७. जराचिकित्सा - रसायनविद्येति अस्यापरं नाम। शरीरस्थानां सप्तधातूनां पोषणेन आरोग्यं, कर्मसौष्टवं च सम्पादयितुम् उपकरोतीयं विधिः।

८. विषचिकित्सा -वाजीकरणतन्त्रमिति प्रसिद्धेऽस्मिन् विभागे यौवनसंरक्षणोपायाः सुष्ठु प्रतिपादिताः। शरीरस्य तेजोवर्धकाः उपायाः आयोजिताः।

## सप्तधातवः

रसः,रक्तं,मांसं,अस्थि.मज्जा,मेदः,शुक्लम् ।

.

# तृतीयः पाठः
# शब्दमात्रात् न भेतव्यम्।

## +É¨ÉJÉ¨É

सदुपदेशदायिन्यः कथाः भारते अनेकाः सन्ति। विष्णुशर्मणा रचिताः पञ्चतन्त्रकथाः तासु कथासु नितरां प्रसिद्धाः। पञ्चतन्त्रमुपजीव्य कविना नारायणेन रचितः हितोपदेशः नाम ग्रन्थोऽपि भारते प्रसिद्धः। राज्ञः धवलचन्द्रस्य आस्थानकविरासीत् नारायणः इति चरित्रविदः वदन्ति। तस्य हितोपदेशात् उद्धृता भवति "शब्दमात्रात् न भेतव्यम्" इति कथा।

**उद्देश्यम्** - स्वाभावरूपीकरणं छात्रेषु सद्भावनावर्धनं सधैर्यं कर्मसु व्याप्तुं प्रेरणा च।

**xÉ{ÉhÉÒ** - वाचनम्, लेखनम्, कथाकथनम्, अपग्रथनम्, नाटकाभिनयः च।

**+ÉvÉÉ®ÉÒÉxlÉ:** - हितोपदेशः।

**B.ºÉÒ.]ÒÒ ºÉÉvªÉiÉÉ** - सान्द्रमुद्रिका, ध्वनिमुद्रिका, नववाणी इत्यादयः।

**EòÉ±ÉÉ¶É:** - १२

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| कथा। 'शब्दमात्रात् न भेतव्यम् | कथावाचनम्। संश्लिष्टपदचयनम्। सम्बोधनपदानां चयनम्।अव्ययपदलेखनम् विवेचनम्। चर्चा। कथासम्पुटरचना। नाटकावतरणम्। | कथां वाचयति अर्थं लिखति पदच्छेदं लिखति, समस्तपदानि विग्रहपदानि च लिखति। सम्बोधनपदानि लिखति। अव्ययपदानि लिखति। सम्भाषणं लिखति। कथासम्पुटं निर्माति। नाटकावतारणं करोति। |

**|É´ÉiÉxÉ¨É 1 - EòIÉÉ´ÉÉSÉxÉ¨É*
=q¶ªÉ¨É - {Én{ÉÊ®SÉªÉ: +IÉÉ´ÉMÉ¨ÉxÉ SÉ*
|ÉÊGòªÉÉ -**

अध्यापकः कक्ष्यां प्रविश्य पठितपूर्वां कथां पृच्छतु। कथाकथनानन्तरं छात्रान् संघीकृत्य कथाभागस्य वाचनाय प्रेरयतु। वाचनावसरे क्लिष्टपदानि, नूतनपदानि च चित्वा लिखन्तु। प्रतिसंघं क्लिष्टपदानि तेषाम् अर्थान् च शब्दकोशं निरीक्ष्य शोधयन्तु। पुनः अर्थग्रहणेन वाचनाय निर्दिशतु।

**|É´ÉiÉxÉ¨É 2 - ºÉÎ¶±É¹]{ÉnSÉªÉxÉ¨É*
=q¶ªÉ¨É - ´ÉÉSÉxÉ¨É, +É¶ÉªÉOÉ½hÉ, {ÉnSUÉn±ÉJÉxÉ¨É, Ê´ÉOÉ½´ÉÉCªÉ±ÉJÉxÉ¨É ºÉ¨ÉºiÉ{Én±ÉJÉxÉ SÉ*
|ÉÊGòªÉÉ -** अध्यापकः छात्रान् संघं कृत्वा विविधान् पाठभागन् दत्वा संश्लिष्टपदानां चयनाय निर्दिशति। चर्चानन्तरं सङ्घेषु एकैकः इव कक्ष्यायामवतारयति। अवतारणसमये पदच्छेदे अध्यापकस्य साहाय्यं अवश्यं देयम्।

**|É´ÉiÉxÉ¨É 3** **-** नाटकरूपेणाविष्करणम्।

**=q|¶ªÉ¨É** **-** भाषास्वरूपं भाषाशैलीं चावगत्य अभिनयन्ति*

**|ÉÊGòªÉÉ** **-** छात्रान् द्वे संघे कृत्वा पाठभागस्य सम्यक् वाचनाय निर्दिशतु। नाटकरूपेण परिवर्तनाय कुत्र कुत्र व्यतियानमावश्यकमिति चर्चां प्रचालयति।

नाटकरूपरेखामधिकृत्य सूचनाः अध्यापकेन देयाः।

**ºÉSÉxÉÉ:** नेपथ्यभाषणं, नागरिकाणां भयसूचकः एकः भागः। राज्ञः पुरतः भयकारणस्य परिहारमार्गनिर्देशं दातुमभ्यर्थना। राज्ञः उद्घोषणं। वृद्धाया; आगमनं निरीक्षणं, घण्टायाः अपहरणं भटैः सह वृद्धाया; भाषणं। राज्ञः सकाशं प्राप्य वृद्धा सम्मानं स्वीकरोति इति पञ्च भागाः। सूचनाा अननुसृत्य नाटकरूपेण छात्राः अध्यापकः पर्याप्तं साहाय्यं ददाति। संघे चर्चां कृत्वा योग्यान् छात्रान् कथापात्रत्वेन अध्यापकः चिनोति। छात्राः पठित्वा अवतारयन्तु। अवतरणावसरे अपरः संघः मूल्यनिर्णयं करोतु ।

**¨É±ªÉÉÊxÉhÉªÉºÉÊSÉEòÉ:-** उचितभावः,अवतारणशैली।उचितवेषः,सम्भाषणव्यक्तता।

**xÉÉ{ÉEòÉ**ी-(कश्चित् चोरः मन्दिरात् बहूनि वस्तूनि चोरयित्वा वनं गतः।व्याघ्रस्य आक्रमणेन सःहतः। तदा तेन अपहृतानि वस्तूनि वने अपतन्।केचन वानराःकूतुहलेन तेषु वस्तुषु एकां घण्टां हस्ते घृत्वा अधून्वन्।घण्टानादेन चोराःचकिताः।पुनः पुनःघण्टामधुन्वन् घण्टानादं च अश्रुण्वन्। नागरिकाः भयाकुलाः अभवन्)

**|ÉlÉ¨É: ®ÆMÉ:**

(ग्रामप्रदेशः/संघरूपेण जनाःतिष्ठन्ति) भोः,घण्टाकर्णः पुनरागतः इति श्रूयते,सत्यं वा?

**ÊuiÉÒªÉ**:- आम्,आम्,अहमपि श्रुतवान्।

**+{É®&** **-** आम्, नरभोजी घण्टाकर्णः पुनरपि आगच्छति वा?

**|ÉlÉ¨É:** **-** अपघातः, शीघ्रं पलायामः।

**ÊuiÉÒªÉ:** **-** एवं चेत् राज्ञे न्यवेदयामि, शीघ्रं गच्छामः।

(उद्वेगपूर्वं जनाः गच्छन्ति)

## ÊuliÉÒªÉ ®MÉ:

(राजगृहम् अथवा राजसभा, जनाः प्रविशन्ति)

जनाः - महाराजन्, रक्षतु रक्षतु।

राजा - चिन्ता मास्तु, किमत्र भोः? न भेतव्यम्।

जनाः - राजन्, घण्टाकर्णः ग्रामे आगतः। सः जनान् हनिष्यन्ति।
रक्षतु भोः भो रक्षतु।

राजा - (विचिन्त्य) अमात्येन साकं चर्चा कार्या। अमात्यान् आह्वयतु।

राजा (सेवकं प्रति) - प्रधानममात्यमानयतु।

भट - राजन्, तथास्तु।

## iÉiÉÒªÉÉ ®MÉ (चतुष्पदः)

सेवकः (घोषणं ददाति) अयि भो जनाः
श्रुयतां श्रूयतां महाराजस्य उद्घोषणम्।
"यः घण्टाकर्णं मारयति तस्मै बहूनि सुर्वणानि
. दास्यामि"।

(वृद्धा प्रविश्य)

वृद्धा - (स्वगतम्) - कुतः इयमुद्घोषणा ?

राज्ञः वा? घण्टाकर्णः मृतः। भवतु एवं करिष्यामि। सत्यं वा? घण्टाकर्णं हनिष्यामि
चेत् सुवर्णं लभते किम्?

सेवकः:- नूनम्। कोऽत्र संशयः?

वृद्धा - यावच्छक्यं यतिष्ये।
(गच्छति।)

(नेपथ्ये)

वृद्धा वनं गत्वा तत्र किञ्चित् कालं निर्भयं अवसत्। वानराः एव घण्टां वादयन्ति इति ज्ञात्वा, वानरेभ्यः मधुराणि फलानि अयच्छत्। फलखादने मग्नेभ्यः वानरेभ्यः घण्टामादाय सा नृपं प्राप।

**SÉiÉlÉ: ®iMÉ:***

(राजगृहम्। द्वौ सेवकौ)

सेवकः - का त्वम्? किमर्थमागता?

वृद्धा - अहम् अस्मिन् देशवासिनी काचन साध्वी वृद्धा। महाराजं द्रष्टुमागता।

सेवकः - किमर्थम्?

वृद्धा - अहं घण्टाकर्णं अमारयम्।

सेवकः - हे अम्ब! सत्यं वा? तिष्ठ। राज्ञे निवेदयामि।

(अन्यं सेवकं प्रति) त्वमत्र इमां प्रतीक्ष्य वर्तस्व।

वृद्धा - (आत्मगतम्) किमिदानीं भविष्यति।
(चिन्ताकुलोऽभूत्वा तिष्ठति)
(एकः सेवकः प्रविश्य अन्ये सेवकं प्रति)

सेवकः - वृद्धां राज्ञः पुरतः प्रवेशय

वृद्धा - (प्रविश्य)- जयतु महाराजः जयतु।

राजा - (वृद्धां प्रति) त्वं घण्टाकर्णम् अमारयः वा?
हे सेवकाः! सत्यं वा?

सेवकाः - आम्, सत्यमेव। इदानीं घण्टानादः न श्रूयते। जना; भयरहिताः सन्तुष्टाश्च।

राजा - सन्तुष्टो स्मि। अरे, आनीयतां सम्मानम्।
(वृद्धाम् प्रति) स्वीकरोतु भवती

नेपथ्ये -

भयशीलः सदा भीतो
येन केनापि हेतुना।

परीक्ष्यै वाधि गच्छन्ति
धीरास्तु भयकारणम्।।

**प्रवर्तनम्** - **कथासम्पुटनिर्माणम्।**

**उद्देश्यम्** - **समानाशयकथानां लेखनम् (चयनम्)।**

**प्रक्रिया** -

छात्रान् वैय्यक्तिकरीत्या पाठभागं निर्दिशतु। नववाणिद्वारा, कथाकदम्बपुस्तिकाद्वारा वा लेखनाय साहायम् अध्यपकेन ददातु। सञ्चितपुस्तके लेखनाय निर्दिशतु मूल्यनिर्णयमपि अध्यापकेन करोतु।

**प्रवर्तनम् ३** - **सम्बोधनरूपाणां चयनम्।**

**उद्देश्यम्** - **सम्बोधनरूपाणा ज्ञानम्। (विभक्तिज्ञानम्)**

**प्रक्रिया** -

छात्रान् वैयक्तिकरीत्या पाठभागं, अनुबन्धकार्यं च पठित्वा सम्बोधनरूपाणां चयनाय निर्दिशति। एकैकम् अवतारणाय निर्दिशति। स्खालित्यं परिहरति।

उदा ' - हे राजन्
हे सेवकाः।
हे वृद्धे!
अयि भोः
हे अम्ब!

| सम्बोधनरूपम् | व्याक्षेपकरूपम् |
|---|---|
| हे राजन् | अयि भोः |
| हे सेवकाः | |
| हे वृद्धे | |
| हे अम्ब | |

**प्रवर्तनम् 4** - **पट्टिकाकरणम्।**

**उद्देश्यम्** - **अव्ययज्ञानम्।**

**प्रक्रिया** -

छात्रान् संघे स्थित्वा पाठभागस्य सम्यक् वाचनाय निर्दिशति। अनन्तरम् अनुबन्धे दत्तम् "अव्ययानि" इति भागं पठित्वा 'क्त्वा' प्रत्ययान्तं पदं पाठभागत् उद्धृत्य लिखन्तु। अवश्यं साहायमपि देयम्। पुनः पट्टिकायां योजयन्तु। अवतारणानन्तरं स्खालित्यं परिहरति।

यथा

| **क्त्वान्तं** | **ल्यबन्तं** | **तुमुन्नन्तम्** |
|---|---|---|
| भूत्वा | संभूय | चरितुं |
| पीत्वा | निशम्य | चलितुं |
| धावित्वा | अनुभूय | नर्तितुं |

**प्रवर्तनम् 5 - चर्चा, सम्भाषणलेखनम्।**

**उद्देश्यम् - उचितसम्भाषणलेखनम्।**

**प्रक्रिया -**

"चोराणाम् आपदः" कारणम् अधिकृत्य चर्चां कृत्वा उद्भुतानि कार्याणि एकैकं संघं सम्भाषणरूपेण विलिख्य अवतारणाय निर्दिशतु। अध्यापकः साहाय्यं करोतु।

**सम्भाषणम्**

प्रथमः - चोरः कस्माद् चोरयति?

द्वितीयः - मन्दिरात्।

प्रथमः - किं सम्भवति।

द्वितीयः - चोरः मृतः।

प्रथमः - कथम्?

द्वितीयः - व्याघस्य आक्रमणेन।

प्रथमः - अरे मित्र! तस्य कारणं किमिति वक्तुं किल?

द्वितीयः - आम्, वदामि। ईश्वरकोपः एव।

प्रथमः - भोः सुहृदः, किमर्थमीश्वरकोपः?

द्वितीयः - मूढ! चौर्यकर्म पापमेव।

प्रथमः - आम्, स्मरामि-

अष्टादशपुराणेषु
व्यासस्य वचनद्वयं ।
परोपकारः पुण्याय
पापाय परपीडनम्।।

एककम् - २

# मुखं व्याकरणम्

## चतुर्थः पाठः

## संज्ञाप्रकरणम्

### +É ÉJÉ É

वैदिककालादारभ्य सप्तदशशतकपर्यन्तं यथाकालं संस्कृतभाषायां विभिन्नानां व्याकरणानाम् अनेके ग्रन्थाः विरचिताः अभूवन्। तेषु पाणिनीयस्यैव वेदाङ्गत्वं कल्पितम्। पाणिनीयं व्याकरणम् अष्टभिः अध्यायैः गुम्फितत्वात् अष्टाध्यायीति पदेन प्रकीर्त्यते। महर्षिः पाणिनिः अक्षरसमाम्नायादारभ्य लौकिकवैदिकमार्गेण सञ्चरन् किमपि नूतनं व्याकरणतन्त्रं प्रणिनाय। तस्मिन् पाणिनेः प्राक् न कोऽप्याचार्यः सञ्चचार। इदमेव पाणिनीयव्याकरणस्य वैशिष्ट्यम्।

तदनन्तरं कात्यायनो वार्तिकानि व्यरचनयत्। स वररुचिरित्यपि प्रसिद्धः। तदनु पतञ्जलिः पूर्वदृष्टानि शास्त्राणि साक्षात्कृत्य तदनुगुणं भाष्यञ्च निर्ममे। एभिः मुनित्रयम् इति प्रथितैः प्रवर्तिततत्वात् त्रिमुनिव्याकरणमित्यपि इदं व्यवह्रियते।

संस्कृतविद्यालयीयछात्राणां सामान्यव्याकरणावबोधार्थं संज्ञाविधायकसूत्राणि पाठ्यपुस्तके समायोजितानि। संज्ञाप्रकरणं नाम पाठे केचिदंशाः समायोजिताः। छात्राः माहेश्वरसूत्राणि कण्ठस्थीकृत्य यावच्छक्यं प्रत्याहारान् अवगच्छन्तु। संज्ञासूत्राणि संज्ञावबोधर्थम् अभ्यसनीयानि।

+É¶ÉªÉ: - भाषापठनाय व्याकरणं आवश्यकम्।

=qÉ¶ÉªÉ¨É - भाषायाः सुष्टुप्रयोगाय।

{É`ÉxÉxÉ{ÉhÉÒ - वाचनम्, लेखनम् स्मरणम्, अपग्रथनम्।

EòÉ±ÉÉ¶É: - १४

+ÉvÉÉ®ÉÒxÉlÉ: - लघुसिद्धान्तकौमुदी।

| **आशयः/ धारणाः/ व्यवहाररुपाणि** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः** |
|---|---|---|
| संज्ञाप्रकरणम्। (व्याकरणम्)भाषापठनाय व्याकरणं आवश्यकम्।भाषायाः सुष्टुप्रयोगाय। | सूत्रपठनम्। चर्चा। सूत्राणि पठित्वा तदन्तर्गतानां वर्णानां लेखनम्,। उच्चारणम्। प्रत्याहारनिर्माणम्। सूत्रं पठित्वा वृत्तिलेखनम्। सूत्र विवेचनलेखनम् च। | माहेश्वर सूत्राणि पठति। सूत्रान्तर्गतान् वर्णान् लिखति। स्थानसाम्यानुसारं वर्णान् उच्चारयति। प्रत्याहारनिर्मिति। सूत्राणां वृत्तिं अर्थं च वदति वृत्तिं पठित्वा सूत्रं लिखति। |

अध्यापिका कक्ष्यां प्रविश्य कांचन कथां कथयति।

एकदा गुरोः सकाशात् कतिपयवर्षं संस्कृतं पठित्वा आगच्छन्तं पुत्रं प्रति पिता अपृच्छत्। "यद्यपि बहुमानयिषे तथापि पठ पुत्र व्याकरणम्। स्वजनः श्वजनो माभूत् सकलं शकलं सकृच्छकृत् इति।

**अत्र वर्तकानि पदानि श्रुण्वन्तु।**

सकृत् - शकृत्

सकलं - शकलम्

स्वजनः - श्वजनः

सकारस्य शकारस्य च विनिमयेन अथवा उच्चारणवैकल्येन अर्थभेदो जातः।

एव मेव

सकृत् इत्यस्य एकवारं इति।

शकृत् इत्यस्य पुरीषम्।

सकलम् - सर्वम्।

शकलम् - अल्पः

स्वजनः - बन्धुः।

अश्वः - तुरगः।

श्वजनः - शुनकः।

एवं एतादृशानि बहूनि पदानि भाषासु द्रष्टुं शक्यन्ते। छात्राः मातृभाषायां विद्यमानानि एतादृशानि पदानि चित्वा कक्ष्यायां अवतारयन्तु।

अस्तु तव नाम किम्? मम नाम कृष्णः इति। तव नाम किम्? मम नाम लीला इति। "किमर्थं बालानां बालिकानां च नाम दीयते?"। "सुष्ठु" "अस्य संज्ञा कृष्ण" इति। "अस्याः संज्ञा लीला' इति। प्रत्यभिज्ञानार्थमेव संज्ञा। सम्यक् ज्ञायते इति संज्ञा जगति विद्यमानानां सर्वेषां वस्तूनां संज्ञाः वर्तन्ते वा? छात्राः वर्तन्त एव। वर्तन्ते चेत् काश्चन संज्ञाः वदन्तु। छात्राः - वृक्षः, धेनुः गणः, नेत्रम्, नासिका हस्तः, अजः, काकः...... अलमलम्। अयं वृक्ष; अतः अस्य वृक्ष इति संज्ञा। अयं गणः - गणः इति संज्ञा। इयं नासिका - अस्याः नासिका इति संज्ञा।... भाषायाः अवयवाः भवन्ति पदानि। पदानि साधूनि चेत् उद्दिष्टमाशयं प्रकटयति। असाधुपदानि अपक्वानि भवन्ति। साधुशब्दज्ञानार्थम् उद्दिष्टकाशयं प्रकाशयितुं च व्याकरणेन शुद्धा भाषा प्रयोक्तव्या। भाषायाः शुद्ध्यर्थमेव व्याकरणम्। व्याकरणस्य प्रथमं सोपानं भवति संज्ञाप्रकरणम्। तस्मिन् माहेश्वरसूत्राणि विविधाः संज्ञाः च सन्ति।

**प्रवर्तनम् 1 - माहेश्वरसूत्रपठनम्, चर्चा , अक्षरविवेचनम्।**

**उद्देश्यम् - माहेश्वरसूत्रग्रहणम्।**

"नृत्तावसाने नटराजराजो
ननाद ढक्कां नवपञ्चवारम्।
उद्र्घतुकामः सनकादिसिद्धा-
नेतद्विमर्शे शिवसूत्रजालम्।। (नन्दिकेश्वरकाशिका)

अध्यापिका छात्रान् सङ्घान् कृत्वा प्रतिसंघं एकैकं श्लोकं पठितुमवसरं ददाति। एकस्मात् संघादेकः कक्ष्यायामाशयं विशदयति। अध्यापिका पर्याप्तं साहाय्यं ददाति। क्रोडीकृत्य फलके लिखति।

नृत्तावसाने नटराजराजः शिवः सनकादीन् सिद्धान् उद्धर्तुकामः सन् ढक्कां चतुर्दशवारं नादयामास। तदानीं सञ्जातः नादः एव शिवसूत्रजालम् अथवा अक्षरसमाम्नायः 'इति श्लोकस्यास्याशयः।

येनाक्षरसमाम्नायमधिगम्यमहेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।

इति पाणिनीं च प्रस्तौति।

महेश्वरात् अक्षरसमाम्नायम् अधिगम्य सम्पूर्णं व्याकरणशास्त्रं येन रचितं, तस्मै पाणिनये नमः" -इति द्वितीयस्यार्थः।

**प्रवर्तनम्- 2 - (वैयक्तिकप्रवर्तनम्)**

**उद्देश्यम् - माहेश्वरसूत्रग्रहणम्।**

श्लोकालापनानन्तरं चार्ट्र अथवा सी.डी द्वारा माहेश्वरसूत्राणि प्रदर्शयित्वा वैयक्तिकरीत्या उच्चैर्वाचनाय निर्दिशतु। अध्यापिका स्खालित्यं परिहरतु। तदनन्तरं माहेश्वराणि सूत्राणि पठन्तु निर्दिशति। अन्तर्गतवर्णानां विविच्य लेखनाय निर्दिशतु।

| | | | |
|---|---|---|---|
| यथा | - | अ इ उ ण् | - अ, इ, उ |
| | | ऋ ऌ क् | - ऋ, ऌ |
| | | ए ओ ङ् | - ए ओ |
| | | - - - - - - - - - - - - - | |
| | | - - - - - - - - - - - - - - | इति |

अध्यापिका मूल्यनिर्णयं करोतु

मूल्यनिर्णयसूचिकाः - माहेश्वरसूत्रग्रहणम्।
उचितवर्णलेखनम्।

अण् आदि यासां ताः अणादयः। अणादयश्च ताः संज्ञा च अणादिसंज्ञा, ताः अर्थाः (प्रयोजनं) येषां तानि अणादिसंज्ञार्थानि। अन्ते भवाः अन्त्याः। णकारादिवर्णाः इत्संज्ञकाः। लृण्सूत्रे लकारात्परः अकारश्च इत्संज्ञकः इत्यर्थः।

माहेश्वरसूत्राणि पठित्वा पदान्तर्गतान् वर्णान् लिखत।

| **माहेश्वरसूत्राणि** | **वर्णाः** |
|---|---|
| अ इ उ ण् | अ इ उ |
| क प य् | क प |
| ह य व र ट् | ह य व र |
| घ ट ध ष् | घ ढ ध |
| ञ म ङ ण न म् | ञ म ङ ण न |

**प्रवर्तनम् -3 - प्रत्याहारपठनम् वर्णविवेचनम् च।**

**उद्देश्यम् - प्रत्याहारलेखनम्**

**प्रक्रिया -**

अध्यापिका छात्रान् माहेश्वरसूत्राणां सम्यक् पठनाय निर्दिशत्। अनन्तरं चार्ट्पत्रं प्रदर्शयित्वा

**यथा** - अण् - अ, इ, उ।
अक् - अ, इ, उ, ऋ, लृ।
ए ङ् - ए, ओ।
अ च् - अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ।

पठनाय निर्दिशतु। अनन्तरं संङ्घान् कृत्वा माहेश्वरसूत्राणि उपयुज्य अनया रीत्या लेखनाय, दशनिमेषानन्तरं अवतारणाय प्रतिसंघं निर्दिशतु।

मूल्यनिर्णयम् करोतु।

टिप्पणीपुस्तके लेखनाय निर्दिशति।

अच् - अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ

अल् - अ इ ऋ लृ ए ओ ऐ औ ह य व र ल ञ म ङ् ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प य श ष स ह।

अक् - अ इ उ ऋ लृ।

शर् - श ष स।

एच् - ए ओ ऐ औ।

अण् - अ इ उ।

हश् - ह य व र ल ञ म ङ् ण न झ भ घ ढ ध ज ब ग ड द

इण् - इ उ ऋ लृ ए ओ ऐ औ ह य व र ल।

अश् - अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल ञ म ङ् ण न झ भ घ ढ ध ज ब ग ड द

इच् - इ उ ऋ लृ ए ओ ऐ औ

**प्रवर्तनम् 4** -अधोदत्ताः वर्णाः कस्मिन् प्रत्याहारे अन्तर्भवन्ति इति लिखतु।

यथापूर्वं प्रत्याहारान् परिचितवन्तः छात्राः तद्वत् दत्तानां वर्णानां प्रत्याहारविवेचनमपि कुर्वन्तु। मूल्यनिर्णयं करोतु।

मूल्यनिर्णयसूचिकाः - माहेश्वरसूत्रज्ञानम्

उचितस्य प्रत्याहारस्य लेखनम्।

अक्षराणां क्रमीकरणम्।

मूल्यनिर्णयसूचिका- प्रत्याहाराणां ज्ञानम्।
वर्णानां विवेचनम्।

अनन्तरं अध्यापिका एवं रीत्या विशदीकरोतु।

'आदिरन्त्येन सहेता' इति सूत्रे दृष्टं आदिः' 'अन्त्य' इति पदद्वयं उद्दिश्यमानस्य प्रत्याहारस्य आदेः, अन्त्यस्य इतः च सूचकः भवति। अतः अच् इति प्रत्याहारे अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्येतेषां वर्णानां ग्रहणं कार्यम्।

'अल्' इति प्रत्याहारे सर्वे वर्णाः अन्तर्भूताः। प्रत्याहाराणां मध्ये स्थितानाम् इताम् न ग्रहणम्। 'यर्' प्रत्याहारे 'ह' रहितानि व्यञ्जनानि अन्तर्भवन्ति इति ज्ञेयम्। तथा 'वल्' प्रत्याहारे 'य' वर्णं विहाय सर्वाणि व्यञ्जनानि अन्तर्भवन्ति। प्रत्याहारविषये प्रश्नोत्तरक्रीडां प्रचालयतु।

प्रथमसङ्घः द्वितीयसङ्घं प्रति कमपि प्रत्याहारं पृच्छतु। 'एच्' इति प्रत्याहारे के के वर्णाः सन्ति? इति। द्वितीयः सङ्घः ए ओ ऐ औ एते वर्णाः इति उत्तरं वदति चेत् तं प्रोत्साहयतु। एवं प्रश्नोत्तरक्रीडां प्रचालयतु। केचन प्रत्याहाराः -

एङ्। अट्। झल्। चर्। यम्। रल्।

शर्। शल्। इण्। अश् इक् इच्।

एवं समाकलितान् प्रत्याहारान् वर्णान् च चार्ट्पत्रे विलिख्य कक्ष्यायां प्रदर्शयतु।

| | | |
|---|---|---|
| ए ओ ऐ औ | - | एच् |
| इ उ ऋ लृ | - | इक् |
| श ष स | - | शर् |
| ज ब ग ड द | - | जश् |

अ इ उ ऋ लृ ए ओ ऐ औ-अच्

**प्रवर्तनम् - 5 - सूत्राणां पठनं संज्ञाविवेचनम् च।**

**उद्देश्यम् - सूत्राणि सूत्राणामर्थान् च ज्ञात्वा लेखनम्।**

**प्रक्रिया -**

छात्रान् सङ्घान् करोतु। छात्राः सङ्घे उपविश्य सूत्राणि व्याख्यानं च पठित्वा संज्ञाः कर्गजखण्डेषु लिखन्तु। अध्यापिकाः अवश्यं साहाय्यं प्रतिसङ्घं यच्छतु। ततः सर्वे सङ्घाः अवतारयन्तु । अध्यापिका छात्रैः विवेचितानि संज्ञासूत्राणि व्याख्यानं च उच्चैः पठित्वा चर्चां च कृत्वा साधुतां परीक्षिताम्।

अनन्तरं अध्यापिकाः संघद्वयं करोतु। प्रतिसंघं समानसख्याः चिटिकाः वितरतु। पाठं पठित्वा चिटिकासु संज्ञाविधायकसूत्राणां लेखनाय छात्रान् निर्दिशन्तु। यः संघः निर्दिष्टसमये संज्ञाविधायकानि सूत्राणि विविच्य लिखति अवतारयति च सः विजयी इति घोषणीयः। तदनन्तरं संज्ञासूत्राणां कथनक्रीडां चालयतु।

यथा - संहितासंज्ञा - परः सन्निकर्षः संहिता

गुणसंज्ञा- अदेङ्गुणः

पदसंज्ञा - सुप्तिङन्तं पदम्

वृद्धिसंज्ञा - वृद्धिरादैच्

उपसर्गसंज्ञा - उपसर्गाः क्रियायोगे

धातुसंज्ञा - भूवादयो धातवः।

अध्यापिका मूल्यनिर्णयं करोति।

मूल्यनिर्णयसूचकाः - सूत्रार्थग्रहणम्।
वृत्तिलेखनम्।
व्याख्यानलेखनम्।

अदर्शनम् लोपः

प्रसक्तस्याऽदर्शनं लोपसंज्ञं स्यात्।

टिप्पणिः - द्विपदं सूत्रम्। दर्शनस्य अभावः अदर्शनम् इति विग्रहः। शास्त्रतः शब्दस्य कस्यचित् प्रसक्तस्य वर्णस्य दर्शनाभावः श्रवणाभावः लोपसंज्ञः स्यात्।

यथा 'अच्' इति प्रत्याहारेण 'अ इ उ ऋ लृ ए ओ ऐ औ' इत्येते वर्णाः गृहन्ते। अत्र अइउण् इत्यस्य ण्, ऋलृक् इत्यस्य क्, एओङ् इत्यस्य ङ्, ऐऔच् इत्यस्य च् इतः। ते अदर्शनाः भवन्ति। तेषामेव लोपसंज्ञा।

**सुप्तिङन्तं पदम्**

सुबन्तं तिड़न्तं च पदसंज्ञं स्यात्।

टिप्पणिः - द्विपदं सूत्रम्। सुप् च तिङ् च - सुप्तिङौ। सुप्तिङौ अन्ते यस्य तत् सुप्तिङन्तम् अन्तशब्दस्य प्रत्येकं योगः। सुप् इति स्वौजसमौडिति। सुपः पकारेण प्रत्याहारः,एवं सु औ जस् आदीनां 22 विभक्तिप्रत्ययानां ग्रहणम्। तिङ् इति पदेन तिप्- तस्-झि इति 17 प्रत्यायानां ग्रहणमपि। एवं रामः रामौ रामाः इति सुबन्तानि,भवति - भवतः भवन्ति इति तिङ्न्तानि च 'पद' मिति व्यवह्रियन्ते इति भावः।

पदमेव प्रयोगार्हम्, न केवला प्रकृतिःनापि प्रत्ययः।

**अदेङ् गुणः।**

अत् एङ् च गुणसंज्ञः स्यात्।

टिप्पणिः - द्विपदं सूत्रम्। अत् एङ् गुणः इति पदच्छेदः। एङ् इति, प्रत्याहारः। 'अत्' इति ह्रस्वाकारं सूचयति। 'अ ए ओ' इत्येते गुणाः।

**वृद्धिरादैच्।**

आदैच्च वृद्धिसंज्ञः स्यात्।

टिप्पणिः - त्रिपदं सूत्रम्। वृद्धिः, आत्, ऐच् इति पदच्छेदःवृद्धिसंज्ञाविधायकं सूत्रं भवतीदम्।ऐ औ इति वर्णौ ऐच् प्रत्याहारे अन्तर्भवतः। वाक्येषु प्रथमम् 'उद्देश्यं'ततः विधेयम् इति व्यवस्था। अत्र तु आत् ऐच् च उद्देश्यौ । 'वृद्धिः' इति विधेयञ्च। अतः आदैच् वृद्धिः इति वक्तव्यम्। किन्तु आदौ वृद्धिशब्दस्य प्रयोगः ग्रन्थारम्भे मङ्गलसूचनार्थमेव।'वृद्धिरादैच्' इति सूत्रम् अष्टाध्याय्याःप्रथमं सूत्रं भवति।

**अधिकविस्तरः**

परः सन्निकर्षः संहिता।

वर्णानामतिशायितः सन्निधिः संहितासंज्ञः स्यात्।

टिप्पणिः - परः अतिशायितः। सन्निकर्षः सामीप्यम्।अर्धमात्राधिककालव्यवधानाभावः। यदि संहिता अस्ति तर्हि सन्धिः भवति। एकपदे धातूपसर्गादिषु समासे च संहिता नित्या। संहितायामेव सन्धिः।

**उपसर्गाः क्रियायोगे।**

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः।

टिप्पणिः - उपसर्गसंज्ञा अनेन सूत्रेण विधीयते। प्रतिगच्छति अनुगच्छतीत्यादिषु प्रति अनु एतौ उपसर्गौ भवतः। परम् अनुदिनं प्रतिदिनम् इत्यादिषु 'प्रति' 'अनु' एतौ उपसर्गौ न, अव्यये। प्रादीनां क्रियायोगे उपसर्गसंज्ञा।

निस्, निर्, दुस्, दुर् इति रेफान्तत्वेन सकारान्तत्वेन च पाठः निरयः निलयः दुरयः दुलयः इत्यादि रूपद्वयसिद्ध्यर्थमेव। उपसर्गयोगे धातोः व्यत्यासो भवति। यथा -

हरति - हरणार्थे।

आहरति - भक्षणं करोति। (भक्षणार्थे)

विहरति - क्रीडां करोति

प्रहरति - ताडनं करोति

परिहरति - निर्माजनं करोति

**एवमन्यत्रापि।**

**भूवादयो धातवः।**

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।

टिप्पणिः - अनेन सूत्रेण धातुसंज्ञा विधीयते।भूश्च वाश्च भूवौ। आदिश्च आदिश्चआदी। प्रथमः आदिशब्दः प्रभृतिवचनः, द्वितीयस्तु(सदृश) प्रकारवचनः। भूवौ आदी येषां ते भूवादयः भूप्रभृतयो वासदृशाश्च ये, ते धातुसंज्ञकाः इत्यर्थः। प्रभृत्यर्थसूचकःआदिशब्दः 'वा' शब्देन च युज्यते। भू शब्दस्य वा शब्दस्य च सदृश्यं न रूपेण,परम् अर्थेन एव। अतः क्रियावाचित्वेन सादृश्यम्। एवं क्रियावाचिनः 'भू'
आदयः शब्दाः धातवः इत्यर्थे लभ्यन्ते।सर्वनाम 'या' शब्द विकल्पार्थद्योतक 'वा'

इत्यव्ययं च छातुसंज्ञौ न भवतः। यतःतौ क्रियावाचिनौ न भवतः।तथा ऋते, नामादीनि वर्जनार्थकाव्ययानि क्रियावाचीनि। परन्तु भूवादिषु नअन्तर्भवन्ति। अतः धातवश्च न।

वर्णः - अविभाज्य एक नादो वर्णः।

स्वरः - स्वयमुच्चारणार्हो वर्णः स्वरः तदनर्हं व्यञ्जनम्।

ह्रस्वस्वरः - एकया मात्रयोच्चार्यमाणः स्वरः ह्रस्वः।
(एक मात्रः अच् ह्रस्वः)

दीर्घस्वरः - मात्राद्वयेनोच्चार्यमाणः स्वरः दीर्घः।

लघुः - ह्रस्वस्वरः लघु।

गुरुः - दीर्घस्वरः गुरुः।

संयोगे परे लघु गुरु भवति।

प्रातिपदिकम् - अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

यथा - वृक्ष, तट, वन एतानि प्रातिपदिकानि।

अष्टाध्यायी - अष्टाध्यायी - पाणिनिना विरचितःसंस्कृतव्याकरणग्रन्थः। ग्रन्थोऽयम्अष्टभिरध्यायैः विभक्तः। प्रत्यध्यायं चत्वारः पादाः सन्ति। मार्कि 4000
सूत्राणि विद्यन्ते। अध्यायः पादः -सूत्रम् इति क्रमेण। सूत्राणाम् अन्ते संख्या, दत्ता। यथा वृद्धिरादैच्

1-1-1 प्रथमाध्याये प्रथमपादे
प्रथमं सूत्रमित्यर्थः।

**प्रत्याहारः** - प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः अस्मिन् इति प्रत्याहारः।वर्णसमाम्नायसूत्रेषु पूर्वेण णकारेण एकःप्रत्याहारः अण्। ककारेण त्रयः - अक् इक् उक्। ङकारेण एकः - एङ्। चकारेण चत्वारः - अच्, इच्, एच्, ऐच्। टकारेण एकः - अट्। परेण णकारेण त्रयः अण् इण् यण्। मकारेण त्रयः अम्, यम् ङम्। ञकारेण एकः। षकारेण द्वौ झष् भष्। शकारेण षट् - अश्, हश् वश् झश् जश्, बश्। वकारेण एकः छव्। यकारेण चत्वारः - यय् मय् झय् खय् रेफेण पञ्च - यर्, झर्, खर्, चर्, शर्। लकारेण षट् - अल्, हल्, वल् रल् झल् शल्। अकारेण एकः 'र' प्रत्याहारः । इति प्रत्याहाराः एकचत्वारिंशत्।

**प्रवर्तनम् 6 - स्थानसाम्यानुसारं वर्णानां विवेचनम्।**

**उद्देश्यम् - स्थानसाम्यानुसारं वर्णानां उच्चारणम्।**

**प्रक्रिया -**

कण्ठः, तालु, मूर्धा, ओष्ठौ, दन्ताः इति विलिख्य एकस्यां पेटिकायां स्थापयतु। अनन्तरं प्रतिसङ्घम् एकः आगत्य एकां चिटिकां स्वीकृत्य तत्तत्स्थानीयान् वर्णान् अवतारयतु। अन्ते सर्वे छात्राः सर्वेषां वर्णानां स्थानानि टिप्पणीपुस्तके लिखन्तु। वैयक्तिकमिदं प्रवर्तनम्। अध्यापिका मूल्यनिर्णयं करोति।

मूल्यनिर्णयसूचिकाः - वर्णानाम् उच्चारणस्थानग्रहणम्।
स्पष्टोच्चारणम्।
स्थानसाम्यानुसारं लेखनम्।

| | | | | |
|---|---|---|---|---|
| 1. | ह अ ख | - | कण्ठः। | अकुहविसर्जनीयानां कण्ठः |
| 2. | झ य इ श | - | तालु। | इचुयशानां तालु। |
| 3. | ढ र ऋ ष ट | - | मूर्धा। | ऋटुरषाणां मूर्धा। |
| 4. | ओ औ | - | कण्ठोष्ठम्। | ओदौतोः कण्ठोष्ठम्। |
| 5. | ए ऐ | - | कण्ठतालु। | एदैतोः कण्ठतालु। |

**प्रवर्तनम् 7 - वर्णानाम् पट्टिकाकरणम्।**

एवं पूर्वोक्तप्रकारेण स्थानसाम्यानुसारं वर्णानां पट्टिकाकरणाय निर्दिशतु। अनन्तरं सर्वैः छात्रैः पट्टिकाकरणं कृतं चेत् अध्यापिका मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिकाः**-स्थानसाम्यानुसारं उच्चारणम्।
पट्टिकाकरणम्।

| कण्ठतालु | मूर्धा | दन्तोष्ठम् | कण्ठोष्ठम्। |
|---|---|---|---|
| ए,ऐ | र, ट, ष | व | ओ,औ |

एककम् - ३

# काव्यभूषणम्

## पञ्चमः पाठः

## अलङ्काराः

**आमुखम्**

अलङ्क्रियते अनेन इति अलंकारः। काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते। शब्दार्थोकाव्यशरीरम्।काव्यास्वादननैपुणीवर्धनार्थम् अलंकाराणां प्रतिपादनम् अस्मिन् पाठ्यपुस्तके कृतम्।उपमा,दीपकं,स्वभावोक्तिः इति अलङ्कारत्रयम् अस्मिन् पाठभागे आयोजितम्।

पाठस्य नाम - अलंकाराः

आशयः - काव्यास्वादनम्।

**उद्देश्यम्** - काव्यास्वादने तात्पर्यं जनयति।

**xÉ{ÉhÉò** - वाचनम्, लेखनम्, प्रयोगपाटवम्।

**+ÉvÉÉ®ÉOÉxlÉ:** - कुवलयानन्दः

**B.ºÉò.]õ ºÉÉvªÉiÉÉ** - सान्द्रमुद्रिका, ध्वनिमुद्रिका, नववाणी इत्यादयः।

**EòÉ±ÉÉ¶É:** - १२

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| विवरणम्। काव्यास्वादनाय अलङ्कारपठनमावश्यकम्। | अलङ्काराणां पठनम्। चर्चा अलकाराणां विवेचनम्। लक्ष्यलक्षणपूर्वकलोखनम्। अलङ्कारनिर्णयः। | अलङ्कारकारिकां पठति। श्लोकान् पठित्वा अलङ्कारान् विवेचयति। अलङ्कारस्य लक्ष्यलक्षणसमन्वयरूपं लिखति। श्लोकान् पठित्वा अलङ्कारं निर्णयति। |

**प्रवर्तनम् -1 - अलङ्कारपठनम्।**

**उद्देश्यम् - काव्यगतालङ्काराणां सौन्दर्यास्वादनम्।**

**प्रक्रिया :-**

छात्रेषु काव्यास्वादनसामर्थ्यं वर्धयितुं पाठोऽयं समाकलितः। अलङ्कारपठनं न केवलं लक्ष्यलक्षणसमन्वयेन समाप्तं भवेत् इति विचार्य एव उदाहरणान्तराणि समायोजितानि। अलङ्कारलक्षणं सरलया रीत्या प्रतिपादयितुं यत्नः कार्यः। उदाहरणत्वेन दत्तं श्लोकमधिकृत्य कक्ष्यायां चर्चा प्रचालनीया। तत्र लक्षणसमन्वयः कथमिति अवगच्छन्तु।

यत्र द्वयोः वस्तुनोः उपमानोपमेययोः सहृदयहृदयाह्लादजनकं सादृश्यं वाच्यतया प्रकाशते तत्र उपमालङ्कारः।

उदा - हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।

हे कृष्ण! ते कीर्तिः हंसी इव स्वर्गङ्गाम् अवगाहते इति अन्वयः। अत्र कीर्तिहंस्योः स्वर्गङ्गावगाहनरूपा सादृश्यलक्ष्मीः उल्लसति। तस्मात् उपमालङ्कारः।

उपमालङ्कारस्य चत्वारो घटकाः सन्ति। उपमेयम्, उपमानम्, साधारणधर्मः, उपमावाचकश्च।

**उपमेयम्**

यद् उपमीयते तद् उपमेयम् (न्यूनगुणम् उपमेयम्)। वर्ण्यमिति यावत्।

**उपमानम्**

येनोपमीयते तद् उपमानम् (अधिकगुणम् उपमानम्)।अवर्ण्यमिति यावत्।

**साधारणधर्मः**

उपमानोपमेययोः समानः धर्मः साधारणधर्मः।

**उपमावाचकः**

**इवा**दिशब्दाः उपमावाचकाः। यत्र एतेषां चतुर्णां घटकानां शब्दैः उपादानं तत्र पूर्णेपमा भवति।

अस्मिन् उदाहरणे-

कृष्णस्य कीर्तिः - उपमेयम्

हंसी - उपमानम्

इव - उपमावाचकः

स्वर्गंगाम् अवगाहनम् - साधारणधर्मः।

अत्र चत्वारः घटकाः सन्ति चेत् पूर्णोपमा। एकस्य द्वयोः त्रयाणां वा लोपः चेत् लुप्तोपमा।

लुप्तः - अदृष्टः

अनेन प्रकारेण उपमानयुक्तस्य श्लोकस्य परिचायनं करणीयम्।

उदा- तस्यालमेषा क्षुधितस्य तृप्त्यै
प्रदिष्टाकाला परमेश्वरेण।
उपस्थिता शोणितपारणा मे
सुरद्विषा चान्द्रमसी सुधेव।।

परमेश्वरेण प्रदिश्टकाला उपस्थिता एषा शोणितपारणा क्षुधितस्य मे चान्द्रमसी सुधा सुरद्विषा इव तृप्त्यै अलम्।

| | |
|---|---|
| एषा शोणितपारणा | - उपमेयम् |
| चान्द्रमसी सुधा | -उपमानम् |
| तृप्त्यै अलम् | -साधारणधर्मः |
| इव | -उपमावाचकः |

मूल्यनिर्णयसूचिकाः-

श्लोकस्याशयः।

घटनायाः विविच्य लेखनम्।

सादृश्यज्ञानम्।

**प्रवर्तनम् -2 अलङ्कारनिर्णयः।**

**उद्देश्यम्- अलङ्काराणां विवेचनज्ञानम्।**

**प्रक्रिया-** छात्राः सङ्घे स्थित्वा श्लोकं पठन्तु। प्रतिसङ्घम् एकः इव श्लोकस्याशयम् अवतारयतु। कः अलङ्कारः इति निर्णयं करोतु।मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिका** - अर्थावगमनम्।

अलङ्कारज्ञानम्।

विविच्य लेखनम्।

**यथा** (क) कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः।।

एकस्मिन् दिने कटं (गण्डस्थलं) कण्डूयमानेव वन्यद्विपेन (वनगजेन) अस्य देवदारुवृक्षस्य त्वक् उन्मथिता उत्पाटिता। अथ अद्रेः तनया पर्वतपुत्री पार्वती असुरास्त्रैः आलीढं व्रणितं सेनान्यं सुब्रह्मण्यम् इव एनं देवदारु दृष्ट्वा शुशोच।

अत्र वर्ण्यवस्तु देवदारु। अवर्ण्यम् स्कन्दः सेनानीः। साधारणधर्मः पुत्रवत् वात्सल्यप्रकटनम्।

उपमावाचकशब्दः इव। अत्र चत्वारः घटकाः सन्ति इत्यतः पूर्णोपमा।

यत्र उपमानोपमेयोः सहृदयहृदयाह्लादकत्वेन सादृश्यं भाति व्यक्ततया स्पष्टं प्रकाशते तत्र उपमालङ्कारः।

'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः"

(ख) मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरितः स्त्यानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः।।

अस्मिन् श्लोके शाणोल्लीढः मणिः, प्राप्तक्षतः विजयशीलः योद्धा, मदेन क्षीणितः गजः, शरत्काले कृशा नदी, एककलावशिष्टः चन्द्रः, सुरतक्रीडया क्षीणिता बालवनिता च उपमानानि। याचकेभ्यो स्वीयं सम्पूर्णं धनं दत्वा विभवरहिताः राजानः उपमेयानि। एते तनिम्ना 'शोभन्ते' इति क्रियया एकधर्मेऽन्वयः। अतः दीपकालङ्कारः। वर्ण्यावर्ण्यानां उपमेखोपमानानां एकधर्मान्वये दीपकम्।

## व्याख्यानम्

अस्मिन् श्लोके शाणोल्लीढः मणिः (निकषोपले उल्लेखितः मणिः) हेतिदलितः समरविजयी (अयुधैः कृतक्षतः विजयशीलः योद्धा), मदेन क्षीणितः (नागः) हस्ती, शरदि स्त्यानपुलिनाः सरितः, शरत्काले शुष्काणि पुलिनानि जलनिर्मुक्तटानि यासां ताः सरितः नद्यः कलाशेषश्चन्द्रः,कलामात्रावशिष्टश्चन्द्रः सुरतमृदिता बालवनिता(सुरतेन मृदिता चुम्बनालिङ्गनाद्युपमर्दनैः म्लायिताङ्गी बाला नवयौवना वनिता स्त्री, अर्थिषु गलितविभवाः नृपाः याचकेषु गलितः संक्रान्तः विभवः समृद्धिर्येषां ते नृपाश्च, तनिम्ना - तनोः कृशस्य भावस्तनिमा कार्श्यं तेन (च) शोभन्ते इति तात्पर्यः।

(षणस्तु निकषः कषः -इत्यमरः)

(ग) समुद्वहन्तं सलिलातिभारं
बलाकिनो वारिधरा नदन्तः।
महत्सु शृङ्गेषु महीधराणां
विश्रम्य विश्रम्य पुनः प्रयान्ति।।

बलाकपक्षिसहिताः जलातिभारं वहन्तः वर्षकालमेघाः ध्वनिं कुर्वन्तः पर्वतानां बृहत्सु शिखरेषु अन्तरान्तरा विश्रम्य पुनः गच्छन्ति। अतिभारं ये वहन्ति ते न वेगेन गन्तुं प्रभवन्ति। अत्र वर्षकालमेधस्य स्वभाववर्णनात् स्वभावोक्तिरलङ्कारः।

"स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्"

**प्रवर्तनम् ३ - अलङ्कारस्य लक्ष्यलक्षणसमन्वयः।**

**उद्देश्यम् - अलङ्काराणां विवेचनम्।**

छात्राः वैयक्तिकरीत्या पाठभागस्य वाचनानन्तरं उपमां स्वभावोक्ति ˙ लक्ष्यलक्षणसमन्वयपूर्वं लिखन्तु। मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः**

अर्थग्रहणम्।

अलङ्कारज्ञानम्

लक्ष्यलक्षणपूर्वकं समर्थनम्।

**प्रवर्तनम् ४ - अलङ्कारयुक्तानां श्लोकानां चयनम्**

**उद्देश्यम् - अलङ्काराणां परिचायनम्।**

अध्यापिका छात्रेभ्यः कतिपयान् श्लोकान् ददाति।तेभ्यः समानालंकायुक्तानां श्लोकानां चयनाय निर्दिशतु। मूल्यनिर्णयं करोतु। टिप्पणीपुस्तके लेखनाय निर्दिशतु।

मूल्यनिणयसूचिकाः

अलङ्कारज्ञानम्।

श्लोकानाम् अर्थग्रहणम्।

उचितश्लोकचयनम्।

**उपमा**

(क) अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्याः इव मानदण्डः।।

(ख) सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः।।

**दीपकम्**

(क) भ्रमत्भ्रमरझङ्कारः
पुंस्कोकिलकलध्वनिः।
मन्दचन्दनवातोऽपि
हरन्ति हृदयं नृणाम्।।

(ख) सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्चजानाति सेवितुम्।

**स्वभावोक्तिः**

(क) पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं
दीर्घग्रीवः सःभवति, खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यनैर्व्रजति स पुनर्दूरमेहयेहि यामः।।

# पाठः षष्ठः
# वृत्तपरिचयः।

## आमुखम्

पद्यं चतुष्पदी। तच्छन्दोनिबद्धं भवति। वृत्तं मात्रावृत्तं, वर्णवृत्तं चेति द्विधा। तत्र आर्यादीनि मात्रावृत्ताणि। इन्द्रवज्रादीनी वर्णवृत्तानि च। वर्णवृत्तेषु गणव्यवस्था स्वीकृता। अष्टगणाः सन्ति। एकस्मिन् गणे त्रीणि अक्षराणि। गुरलघुभेदेन वर्णाः द्विधाः।

पाठपुस्तकेऽस्मिन् अनुष्टप्, इन्द्रवज्रा, उपेन्द्रवज्रा उपजातिः इत्येतानि वृत्तानि ् समाकलितानि।

**उद्देश्यम्** - वृत्तबोधः, आलपनचारुतायै रसास्वादनाय च साहाय्यकम्।

**नैपुणीः** - वाचनम्, लेखनम्, विवेचनम्, निर्णयः, आलपनम्।

**कालांशः** - 10

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| विवरणम्। समस्यापूरणम्। काव्यलेखनम् | गणव्यवस्थायाः स्मरणम्। चर्चा। लेखनम्। लघुगुरुविवेचनम् ।लक्षणम् उदाहरणं च। वृत्तनिर्णयः ।आलपनम् । समानवृत्तश्लोकचयनम्। | गणव्यवस्थां पठति। लक्षणं उदाहरणं च पठति। वृत्तं निर्णयति। वृत्तानुसारम् आलपति ।समानवृत्तश्लोकानां चयनं करोति। |

**प्रवर्तनम् -1 (गणव्यवस्थायाः स्मरणम्)**

**उद्देश्यम्** - **गणानां पठनम्।**

**प्रक्रिया** - श्यामफलके कानिचन पदानि लिखति।तेषां लघु - गुरुविभजनं कर्तुं निर्दिशति। ततः को वर्णः लघुः को वर्णः गुरुः भवेत्? इति पृच्छतु। अनन्तरं लघुगुरुविवेचननियमान् अध्यापकः अवतारयतु।

**यथा** - संयुक्ताद्यं दीर्घं
सानुस्वारं विसर्गसम्मिश्रम्।
विज्ञेयम् अक्षरं गुरुः
पादान्तस्थं विकल्पेन।।

इति श्लोकस्य अर्थं मनसि निधाय वर्णानां लघु-गुरु विवेचनं क्रियताम्। यथा संयुक्ताक्षरस्य पूर्वं विद्यमानः लघुः गुरुः भवेत्। तथा दीर्घाक्षराः अनुस्वारसहिताः विसर्गयुक्ताः वर्णाः च गुरवः स्युः। क्वचित् पादान्ते वर्तमानः लगुवर्णोपि गुरुः स्यात्। पश्यतु 'अय्यप्पः' इति पदे 'य्य' इत्यस्य संयुक्ताक्षरस्य पूर्वः वर्णः 'अ' लघुरपि गुरुः एव। एवं 'अय्यप्पः' इत्यत्र 'प्पः'. इति विसर्गसहितत्वात् गुरुः। 'पवित्रम्' इत्यत्र 'त्रम्' अनुखारयुक्तत्वात् गुरुः।

सामान्येन ह्रस्वाक्षराः लघवः दीर्घाक्षराः गुरवः च स्युः। एवं वर्णानां लघुगुरुविवेचनानन्तरं लघुवर्णानामुपरि वक्ररेखया ( ˘ ) अङ्कनं करोतु। गुरुवर्णानामुपरि ऋजुरेखया (-) च। वर्णानां लघुगुरुभेदेन अष्टौ गणाः विद्यन्ते। पाठभागस्य वाचनाय निर्दिशतु। अष्टगणानां नामानि लेखनाय निर्दिशतु। चार्ट्पत्रे प्रदर्शयतु।

यथा -

| विशेषता | गणनाम | चिह्नानि | उदाहरणम् |
|---|---|---|---|
| आदिलघुः | यगणः | ˘ - - | अनेकः। |
| मध्यलघुः | रगणः | - ˘ - | सुन्दरीम्। |
| अन्त्यलघुः | तगणः | - - ˘ | नामानि। |
| आदिगुरुः | भगणः | - ˘ ˘ | खेलति। |
| मध्यगुरुः | जगणः | ˘ - ˘ | करोति। |

| | | | |
|---|---|---|---|
| अन्त्यगुरुः | सगणः | ˘ ˘ - | कुसुमैः। |
| सर्वगुरुः | मगणः | - - - | श्रीरामः। |
| सर्वलघुः | नगणः | ˘ ˘ ˘ | भजति। |

लघुगुरुविवेचनाय दत्तानि पदानि-

(श्रीरामः, सुन्दरीम्, कुसुमैः, अनेकः, भजति।

| | | | |
|---|---|---|---|
| श्रीरामः | - | मगणः | (सर्वगुरुः) |
| सुन्दरीम् | - | रगणः | (मध्यलघुः) |
| कुसुमै | - | सगणः | (अन्त्यगुरुः) |
| अनेकः | - | यगणः | (आदिलघुः) |
| भजति | - | नगणः | (सर्वलघुः) |

**प्रवर्तनम् -2** - **चर्चा, लघुगुरूविवेचनम्।**

**उद्देश्यम्** - **लघुगुरूविविच्य ज्ञात्वा गणनिर्णयः।**

**प्रक्रिया** - छात्रान् पञ्चसंघान् कृत्वा पठनप्रवर्तने दत्तानि पदानि लघुगुरुरूपेण अङ्कनं कृत्वा गणानां नामानि लेखनाय निर्दिशतु। अवश्यम् साहाय्यमपि करणीयम्। अन्यानिपदानि दत्वा पुनः लघुगुरुन् विविच्य गणनिर्णयं करोतु। अध्यापकः मूल्यनिर्णयमपि करोतु।

सूचिकाः - लघुगुरूणां यथास्थाने अङ्कनम्।
गणस्य उचितं नामकरणम्।

| | | | | |
|---|---|---|---|---|
| पठति | - | सर्वलघुः | - | नगणः |
| गच्छति | - | आदिगुरुः | - | भगणः |
| लिखति | - | सर्वलघुः | - | नगणः |
| जननि | - | सर्वलघुः | - | नगणः |
| मारुतः | - | मध्यलघुः | - | रगणः |
| चकार | - | मध्यगुरुः | - | जगणः |

| | | | |
|---|---|---|---|
| यशोदा - | आदिलघुः | - | यगणः |
| विरामं - | आदिलघुः | - | यगणः। |
| भुवनं - | अन्त्यगुरुः | - | सगणः। |
| दिलीपः - | आदिलघुः | - | यगणः। |
| यदियं - | अन्त्यगुरुः | - | सगणः। |
| नियुज्य - | मध्यगुरुः | - | रगणः। |

परिहारबोधनाय पाठभागस्य पदानि उपयुज्य गणिनिर्णयम् अध्यापकेन करोतु। अथवा अधोदत्तस्य श्लोकस्य गुरुलघुनिर्णयाय निर्दिशतु।

यथा - श्रीपतिं प्रणिपत्याहं
श्रीवत्साङ्किंतवक्षसम्।
श्रीरामोदन्तमाख्यास्ये
श्रीवाल्मीकिप्रकीर्तितम्।।

**प्रवर्तनम् -3 - लक्षणम् उदाहरणेन सह समन्वयति।**

**उद्देश्यम् ' - वृत्तपठनम्। वृत्तनिर्णयः।**

**प्रक्रिया -** छात्राः श्लोकं पठित्वा लघुगुरुविवेचनंकृत्वा गणनिर्णयं कुर्वन्तु। वृत्तनिर्णयं कृत्वा लक्ष्यलक्षण समन्वयपूर्वण् अवतारयतु। छात्राः लक्षणम् उदाहरणं च स्वस्वटिप्पणीपुस्तिकासु लिखन्तु।

यथा - वागर्थाविव संपृक्तौ
वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे
पार्वतीपरमेश्वरौ।।

अस्मिन् श्लोके चतुर्ष्वपि पादेषु पञ्चमो वर्णः लघुः भवति षष्ठं गुरुश्च। तथा प्रथमतृतीययोः पादयोः सप्तमो वर्णः दीर्घः (गुरु)। द्वितीयचतुर्थपादयोः सप्तमो वर्णः ह्रस्वः (लघुः) च भवति। अतः एतत् पद्यम् अनुष्टुप्वृत्तनिबद्धं भवति। प्रतिपादम् अष्टवर्णात्मकमिदम्।

अनन्तरं लक्षणं च वदतु।

अनुष्टुप् - श्लोके षष्ठं गुरु ज्ञेयं

सर्वत्र लघु पञ्चमम्।

द्विचतुष्पादयोर्ह्रस्वं

सप्तमं दीर्घमन्ययोः।।

अनया रीत्या इन्द्रवज्रा उपेन्द्रवज्रा, उपजातिः इत्यादीनां लक्षणोदाहरणानि पठतु।

**प्रवर्तनम् 4 - वृत्तनिर्णयः।**

**उद्देश्यम् - वृत्तपठनम्।**

**प्रक्रिया** - छात्रान् संघं कृत्वा एकैकं संघं एकैकस्य श्लोकस्य वृत्तनिर्णयं कर्तुं निर्दिशतु। यथावसरम् अध्यापकः साहाय्यं करोतु। प्रतिसंघम् अवतारणाय निर्दिशतु। स्खालित्यं परिहरतु। टिप्पणीपुस्तके कर्तुं लेखनाय निर्दिशतु। मूल्यनिर्णयमपि अध्यापक : करोतु।

मूल्यनिर्णयसूचिकाः - लगुगुरुभेदनिर्णयः। वृत्तज्ञानम्। वृत्तविवेचनम्।

ज त ज गु गु

अथ प्र/याति प्र/हरे य/शोदा

जने च किञ्चिन्निभृते सनिद्रे।

अस्मिन्नुदाहरणे प्रतिपादं जगणतगणजगणाः गुरुद्वयं च यथाक्रमं भवन्ति।अतः उपेन्द्रवज्रा नाम वृत्तम्।

उपेन्द्रवज्रा - उपेन्द्रवज्रा जतजास्ततो गौ

त त ज

बाहुप्र/तिष्ठम्भ/विवृद्ध/मन्यु-

रभ्यर्णमागस्कृतमस्पृशद्भिः।

राजा स्वतेजोभिरदह्यतान्तर्-

भोगीव मन्त्रौषधिरुद्धवीर्यः।।

अस्मिन् श्लोके प्रतिपादं तगणतगणजगणाः गुरुद्वयं च भवन्ति। अतः इन्द्रवज्रा नाम वृत्तम्।

इन्द्रवज्रा - 'स्यादिन्द्रवज्रा यदि तौ जगौ गः।।

जगणः तगणः जगणः रगणः

अधः क/दाचिच्छ/कटस्य/शायितः
स्वकार्यपर्याकुलया यशोदया।
सलीलया पादसरोरुहं शनै-
रुदञ्चयामास सरोजलोचनः।।

प्रतिपादं जगण-तगण- जगणा-रगणाः भवन्ति चेत् वंशस्थं नाम वृत्तं स्यात्।

वंशस्थम् - "जतौ तु वंशस्थमुदीरितं जरौ"

अयं श्लोकः वंशस्यवृत्तस्य उदाहरणं भवति। उपजातिवृत्तस्य उदाहरणम् अधः दीयते। त त ज गु गु

काचिन्मु/रारेर्व/दनार/विन्दं
संक्रान्त/मालोक्य/जले न/वोढा।
व्यक्तं स/लज्जं प/रिचुम्बि/तुं तत्
तदर्थ/मेवाम्भ/सि निर्म/मज्ज।।

अस्मिन् श्लोके प्रथमद्वितीयतृतीयपादेषु इन्द्रवज्रायाः चतुर्थे पादे उपेन्द्रवज्रायाः च लक्षणानि सन्तीत्यतः उपजातिः नाम वृत्तं स्यात्।

तल्लक्षणं तु - "अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः" इति।

अत्र इन्द्रवज्रायाः (आद्ये पादत्रये) उपेन्द्रवज्रायाः (चतुर्थपादे) च लक्षणं वर्तमानत्वात् उपजातिः नाम वृत्तम्। अत्र प्रथमतृतीयपादौ समानौ, द्वितीयचतुर्थपादौ समानौ इति नियमो नास्ति। चतुर्षु पादेषु यत्र कुत्रापि उभयोरपि सान्निध्यमावश्यकम्।

**प्रवर्तनम् 4 - लक्षणसमन्वयपूर्वं वृत्तनिर्णयम्।**

**उद्देश्यम् - वृत्तनिर्णयावबोधः।**

**प्रक्रिया -** पाठभागं सम्यक् वाचनाय निर्दिशतु। वैयक्तिकरीत्या इन्द्रवज्रा उपेन्द्रवज्रा इत्यादीनि वृत्तानि उदाहरणसहितं लेखनाय निर्दिशतु। साहाय्यमपि करोतु। अवतारणसमये अध्यापकेन मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिकाः -** वृत्तज्ञानम्
लक्ष्यलक्षणसमर्थनम्।
सतालं पठनम्।

यथा - इन्द्रवज्रा-
"स्यादिन्द्रवज्रा यदि तौ जगौ गः।"

प्रतिपादं तगणद्वयं जगणः गुरुद्वयं चेति एकादशवर्णाः यदि स्युः तर्हि इन्द्रवज्रा नाम वृत्तम्। पादान्ते यतिः कल्पनीया।

त त ज गु गु
ये चन्द्र/चूडाच/लचाल/नौक
चातुर्यचिन्तामणये भुजा मे।

अत्र तगणजगणजगणाः गुरूः इति क्रमशः भवन्ति इत्यतः इन्द्रवज्रा।

अनया रीत्या उपेन्द्रवज्रा नाम वृत्तं लक्ष्यलक्षणसमन्वयपूर्वं लेखनाय छात्रान् निर्दिशतु।

**प्रवर्तनम् 6 - समानवृत्तश्लोकचयनम्, आलपनं च।**

**उद्देश्यम् - समानतालयुक्तश्लोकानामालपनम्।**

**प्रक्रिया -**

छात्रान् यावत् शक्यं श्लोकान् सञ्जिनोतुं निर्दिशति। समानतालयुक्तश्लोकान् विविच्य लेखनाय निर्दिशतु। गणनिर्णयमपि कर्तुं छात्राः कुर्वन्तु। यथावसरम् अध्यापकेन साहाय्यमपि करणीयम्। अनन्तरम् समानवृत्तश्लोकानालापनाय निर्दिशति। सम्यग्रीत्या यः आलपति तं अभिनन्दतु। अनन्तरं ध्वनिमुद्रिकायाः साहाय्येन समानवृत्तश्लोकालपनं श्रावयतु।

इक्ष्वाकुवंशोऽभिमतः प्रजानां
जातं च दैवाद्वचनीयबीजम्।
यच्छाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्यदि दूरवृत्तम्।। (इन्द्रवज्रा) (उत्तररामचरिते)

ये चन्द्रचूडाचल चालनैक-
चातुर्यचिन्तामणयो भुजा मे।
तैरेव भूयिष्ठतरैः प्रवृत्त-
श्यापाधिरोपाय कथं न लज्जे।। (इन्द्रवज्रा) (प्रसन्नराघवे)

अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य।। (उपेन्द्रवज्रा)(रघुवंशे)

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव।। (उपेन्द्रवज्रा)

वनेषु कृत्वा सुरभिप्रचारं
प्रकाममुग्धो मधुवासरेषु (उपजाती)
गायन् कलं क्रीडति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ

काचिन्मु/रारेर्वदनार/विन्दं
संक्रान्त/मालोक्य/जले न/वोढा। (उपजाति)

व्यक्तं सलज्जं परिचुम्बितुं तत्
तदर्थमेवाम्भसि निर्ममज्ज।। (अच्युतचरिते)

बालस्यापि रवेः पादाः
पतन्त्युपरि भूभृताम्। (अनुष्टुप्)
तेजसा सह जातानां
वयः कुत्रोऽपयुज्यते। (पञ्चतन्त्रे)

कूजन्तं रामरामेति
मधुरं मधुराक्षरम् (अनुष्टुप्)
आरूह्यकविताशाखां
वन्दे वाल्मीकिकोकिलम्।

वागर्थाविव संपृक्तौ
वागर्थप्रतिपत्तये। (अनुष्टुप्)
जगतः पितरौ वन्दे
पार्वतीपरमेश्वरौ।। (रघुवंशे)

## आदर्शप्रश्नाः

1. अधो दत्तस्य श्लोकस्य गद्यक्रमं लिखतु?

विचित्रपुलिनां रम्यां हंससारससेविताम्।
कुसुमैरुपसम्पन्नां पश्य मन्दाकिनीं नदीम्।।

सूचनाः - विचित्रपुलिनाम् - कुसुमैः उपसम्पन्नाम्।
मन्दाकिनीम् - पश्य।

2. सूचनानुसारं मन्दाकिनी नदीं वर्णयत?

श्रीरामः - शुद्धजलनिर्भरां - चन्द्रसदृरामुखीं सुन्दरैः पुलिनैः - गङ्गानदीं - मनोहरं - महर्षयः चित्रकूटपर्वते - माणिक्यसमजलयुक्ताः - अयोध्यावासात्
नीलकमलानि - स्नानं कुरु।

3. नद्यः अस्मद्संस्कृतेः पोषिकाः इति विषयमधिकृत्य टिप्पणीं लिखत?

4. गद्यभागं पठित्वा संबोधनारूपाणि चित्वा लिखत?

हे मैथिलि! सुन्दरैः पुलिनैः युक्तां विविधैः पुष्पैरलंकृतां गङ्गनदीं पश्य।

5. परस्मैपद-आत्मनेपदरूपाणि विविच्य लिखत।

अदर्शयत्, अब्रवीत्, पश्य, उपतिष्ठन्ते, मन्ये, विगाहस्व।

6. कः गणे नान्तर्भवति।

शिक्षा, यजुर्वेदः, व्याकरणम्।

7. वेदङ्गानि कानि?

8. वेदवेदाङ्गानि चित्वा लिखत।

ऋग्वेदः, कल्पम्, ज्योतिषम्, यजुर्वेदः
व्याकरणम् सामवेदःशिक्षा अथर्ववेदः
छन्दः, निरुक्तम्।

9. प्रदत्तं विषयमधिकृत्य टिप्पणि लिखत।

यजुर्वेदः। अथवा
वेदाङ्गानि।

10. क्त्वान्त-ल्यबन्त-तुमुन्नन्तानाम् पट्टिकां करोतु।

अधीत्य, कृत्वा, प्रत्यागत्य, संरक्षितुम्, दृष्ट्वा, अभिनन्दितुम्।

11. सूचनानुसारं लिखत। (यदा - तदा)

सूचना- यदा सूर्यः उदयते तदा कमलानि विकसन्ति।
अध्यापिका कक्ष्यां प्रविशति। छात्राः उत्तिष्ठन्ति।

13. उदाहरणानुसारं पदानि विश्लेषयतु।

सन्तुष्टो राजा - सन्तुष्टः राजा । एवं चेत्।
सन्तुष्टो युवकः- ———— ?

14. उदाहरणानुसारं एकं पदं लिखत।

भयं विना - निर्भयम्।

दोषं विना - ——————।

अहङ्कारं विना - —————।

15. यथोचितम् योजयत?

| | | |
|---|---|---|
| सनातनधर्मः | - | बैबिल्। |
| इस्लामधर्मः | - | वेदाः। |
| क्रिस्तुधर्मः | - | खुरान् |
| | - | क्रिस्तुभागवतम्। |

16. यथोचितं योजयत।

| | | |
|---|---|---|
| ज्योतिषं | - | पादः |
| छन्दः | - | घ्राणम् |
| निरुक्तं | - | श्रोत्रं |
| व्याकरणम् | - | हस्तौ |
| | - | मुखम् |